સંવત્ ૨૦૬૨ કાર્તિકસુદ ૧૫

સને. ૨૦૦૫ તા. ૧૫-૧૧-૦૫



-: પ્રકાશક :-
શ્રીસ્વામિનારાયણ
મંદિર ભુજ - કચ્છ.

કમ્પોઝ સેટીંગ
શ્રીનરનારાયણદેવ કોમ્પ્યુટર
શ્રીસ્વામિનારાયણ મંદિર
ભુજ - કચ્છ.

www.
bhujmandir.org

www.
jayswaminarayan.org

# श्रीविष्णु सहस्रनाम स्तोत्रम्

## શ્રી વિષ્ણુ સહસ્ર નામાવલી

યસ્ય સ્મરણમાત્રેણ જન્મસંસારબંધનાત્ ।
વિમુચ્યતે નમસ્તસ્મૈ વિષ્ણવે પ્રભવિષ્ણવે ॥૧॥
શ્રુત્વા ધર્માનશેષેણ પાવનાનિ ચ સર્વશઃ ।
યુધિષ્ઠિરઃ શાન્તનવં પુનરેવાભ્યભાષત ॥૨॥
કિમેકં દૈવતં લોકે કિં વાપ્યેકં પરાયણમ્ ।
સ્તુવન્તઃ કં કમર્ચન્તઃ પ્રાપ્નુયુર્માનવાઃ શુભમ્ ॥૩॥
કો ધર્મઃ સર્વધર્માણાં ભવતઃ પરમો મતઃ ।
કિં જપન્ મુચ્યતે જન્તુર્જન્મસંસારબન્ધનાત્ ॥૪॥
જગત્પ્રભું દેવદેવમનન્તં પુરુષોત્તમમ્ ।
સ્તુવન્નામસહસ્રેણ પુરુષઃ સતતોત્થિતઃ ॥૫॥
તમેવ ચાર્ચયન્નિત્યં ભક્ત્યા પુરુષમવ્યયમ્ ।
ધ્યાયન્ સ્તુવન્નમસ્યંશ્ચ યજમાનસ્તમેવ ચ ॥૬॥
અનાદિનિધનં વિષ્ણું સર્વલોકમહેશ્વરમ્ ।
લોકાધ્યક્ષં સ્તુવન્નિત્યં સર્વદુઃખાતિગો ભવેત્ ॥૭॥
બ્રહ્મણ્યં સર્વધર્મજ્ઞં લોકાનાં કીર્તિવર્ધનમ્ ।
લોકનાથં મહદ્ભૂતં સર્વભૂતભવોદ્ભવમ્ ॥૮॥
એષ મે સર્વધર્માણાં ધર્મોઽધિકતમો મતઃ ।
યદ્ ભક્ત્યા પુણ્ડરીકાક્ષં સ્તવૈરર્ચેન્નરઃ સદા ॥૯॥
પરમં યો મહત્તોજઃ પરમં યો મહત્તપઃ ।
પરમં યો મહદ્બ્રહ્મઃ પરમં યઃ પરાયણમ્ ॥૧૦॥
પવિત્રાણાં પવિત્રં યો મઙ્ગલાનાં ચ મઙ્ગલમ્ ।
દૈવતં દેવતાનાં ચ ભૂતાનાં યોઽવ્યયઃ પિતા ॥૧૧॥
યતઃ સર્વાણિ ભૂતાનિ ભવન્ત્યાદિયુગાગમે ।
યસ્મિંશ્ચ પ્રલયં યાન્તિ પુનરેવ યુગક્ષયે ॥૧૨॥
તસ્ય લોકપ્રધાનસ્ય જગન્નાથસ્ય ભૂપતે ।
વિષ્ણોર્નામસહસ્રં મે શૃણુ પાપભયાપહમ્ ॥૧૩॥
યાનિ નામાનિ ગૌણાનિ વિખ્યાતાનિ મહાત્મનઃ ।
ઋષિભિઃ પરિગીતાનિ તાનિ વક્ષ્યામિ ભૂતયે ॥૧૪॥
અસ્ય શ્રીવિષ્ણોર્દિવ્યસહસ્રનામસ્તોત્ર મન્ત્રસ્ય ભગવાન્ વેદવ્યાસ ઋષિઃ । શ્રીવિષ્ણુઃ પરમાત્મા દેવતા । અનુષ્ટુપ્ છન્દઃ । અમૃતાંશૂદ્ભવો ભાનુરિતિ બીજમ્ । દેવકીનન્દનઃ સ્રષ્ટેતિ શક્તિઃ । ત્રિસામા સામગઃ સામેતિ હૃદયમ્ । શંખભૃન્નન્દકી ચક્રીતિ કીલકમ્ । શાર્ઙ્ગધન્વા ગદાધર

ઈત્યસ્ત્રમ્ । રથાઙ્ગપાણિ-રક્ષોભ્ય ઈતિ કવચમ્ । ઉદ્ભવઃ ક્ષોભણો દેવ ઈતિ પરમો મન્ત્રઃ । શ્રીમહાવિષ્ણુપ્રીત્યર્થે જપે વિનિયોગઃ ।

## અથ ન્યાસઃ

વિશ્વં વિષ્ણુર્વષટ્કાર ઈત્યઙ્ગુઠાભ્યાં નમઃ । અમૃતાંશૂદ્ભવો ભાનુરિતિ તર્જનીભ્યાં નમઃ । બ્રહ્મણ્યો બ્રહ્મકૃદ્બ્રહ્મેતિ મધ્યમાભ્યાં નમઃ । સુવર્ણબિન્દુરક્ષોભ્ય ઈત્યનામિકાભ્યાં નમઃ । નિમિષોઽનિમિષઃ સ્રગ્વીતિ કનિષ્ઠિકાભ્યાં નમઃ । રથાઙ્ગપાણિરક્ષોભ્ય ઈતિ કરતલકરપૃઠાભ્યાં નમઃ । એવં હૃદયાદિન્યાસઃ ।

## અથ ધ્યાનમ્

શાન્તાકારં ભુજગશયનં પદ્મનાભં સુરેશં ।
વિશ્વાધારં ગગનસદૃશં મેઘવર્ણં શુભાઙ્ગમ્ ॥
લક્ષ્મીકાન્તં કમલનયનં યોગિભિર્ધ્યાનગમ્યમ્ ।
વન્દે વિષ્ણું ભવભયહરં સર્વલોકૈકનાથમ્ ॥૧॥

।। ૐ નમો ભગવતે વાસુદેવાય ।।

## ॥ અથ શ્રીવિષ્ણુસહસ્રસ્તોત્રમ્ ॥

વિશ્વં વિષ્ણુર્વષટ્કારો ભૂતભવ્યભવત્પ્રભુઃ ।
ભૂતકૃદ્ભૂતભૃદ્ભાવો ભૂતાત્મા ભૂતભાવનઃ ॥૧॥
પૂતાત્મા પરમાત્મા ચ મુક્તાનાં પરમા ગતિઃ ।
અવ્યયઃ પુરુષઃ સાક્ષી ક્ષેત્રજ્ઞોઽક્ષર એવ ચ ॥૨॥
યોગો યોગવિદાં નેતા પ્રધાનપુરુષેશ્વરઃ ।
નારસિંહવપુઃ શ્રીમાન્ કેશવઃ પુરુષોત્તમઃ ॥૩॥
સર્વઃ શર્વઃ શિવઃ સ્થાણુર્ભૂતાદિર્નિધિરવ્યયઃ ।
સમ્ભવો ભાવનો ભર્તા પ્રભવઃ પ્રભુરીશ્વરઃ ॥૪॥
સ્વયમ્ભૂઃ શમ્ભુરાદિત્યઃ પુષ્કરાક્ષો મહાસ્વનઃ ।
અનાદિનિધનો ધાતા વિધાતા ધાતુરુત્તમઃ ॥૫॥
અપ્રમેયો હૃષીકેશઃ પદ્મનાભોમરપ્રભુઃ ।
વિશ્વકર્મા મનુસ્ત્વષ્ટા સ્થવિષ્ઠઃ સ્થવિરો ધ્રુવઃ ॥૬॥
અગ્રાહ્યઃ શાશ્વતઃ કૃષ્ણો લોહિતાક્ષઃ પ્રતર્દનઃ ।
પ્રભૂતસ્ત્રિકકુબ્ધામ પવિત્રં મઙ્ગલં પરમ્ ॥૭॥
ઈશાનઃ પ્રાણદઃ પ્રાણો જ્યેષ્ઠઃ શ્રેષ્ઠઃ પ્રજાપતિઃ ।
હિરણ્યગર્ભો ભૂગર્ભો માધવો મધુસૂદનઃ ॥૮॥
ઈશ્વરો વિક્રમો ધન્વી મેધાવી વિક્રમઃ ક્રમઃ ।
અનુત્તમો દુરાધર્ષઃ કૃતજ્ઞઃ કૃતિરાત્મવાન્ ॥૯॥
સુરેશઃ શરણં શર્મ વિશ્વરેતાઃ પ્રજાભવઃ ।
અહઃ સંવત્સરો વ્યાલઃ પ્રત્યયઃ સર્વદર્શનઃ ॥૧૦॥
અજઃ સર્વેશ્વર સિદ્ધઃ સિધ્ધિઃ સર્વાદિરચ્યુતઃ ।
વૃષાકપિરમેયાત્મા સર્વયોગવિનિઃસૃતઃ ॥૧૧॥
વસુર્વસુમનાઃ સત્યઃ સમાત્મા સમ્મિતઃ સમઃ ।
અમોઘઃ પુણ્ડરીકાક્ષો વૃષકર્મા વૃષાકૃતિઃ ॥૧૨॥
રુદ્રો બહુશિરા બભ્રુર્વિશ્વયોનિઃ શુચિશ્રવાઃ ।
અમૃતઃ શાશ્વતઃ સ્થાણુર્વરારોહો મહાતપાઃ ॥૧૩॥
સર્વગઃ સર્વવિદ્ભાનુર્વિષ્વક્સેનો જનાર્દનઃ ।
વેદો વેદવિદવ્યઙ્ગો વેદાઙ્ગો વેદવિત્ કવિઃ ॥૧૪॥
લોકાધ્યક્ષઃ સુરાધ્યક્ષો ધર્માધ્યક્ષઃ કૃતાકૃતઃ ।
ચતુરાત્મા ચતુર્વ્યૂહશ્ચતુર્દંષ્ટ્રશ્ચતુર્ભુજઃ ॥૧૫॥
ભ્રાજિષ્ણુર્ભોજનં ભોક્તા સહિષ્ણુર્જગદાદિજઃ ।
અનઘો વિજયો જેતા વિશ્વયોનિઃ પુનર્વસુઃ ॥૧૬॥
ઉપેન્દ્રો વામનઃ પાંશુરમોઘઃ શુચિરુર્જિત ।
અતીન્દ્રઃ સંગ્રહઃ સર્ગો ધૃતાત્મા નિયમો યમઃ ॥૧૭॥

વેદ્યો વૈદ્યઃ સદાયોગી વીરહા માધવો મધુઃ ।
અતીન્દ્રિયો મહામાયો મહોત્સાહો મહાબલઃ ॥૧૮॥
મહાબુદ્ધિર્મહાવીર્યો મહાશક્તિર્મહાદ્યુતિઃ ।
અનિર્દેશ્યવપુઃ શ્રીમાનમેયાત્મા મહાદ્રિધૃક્ ॥૧૯॥
મહેષ્વાસો મહીભર્તા શ્રીનિવાસઃ સતાંગતિઃ ।
અનિરુદ્ધઃ સુરાનન્દો ગોવિન્દો ગોવિન્દાંપતિઃ ॥૨૦॥
મરીચિર્દમનો હંસઃ સુપર્ણો ભુજગોત્તમઃ ।
હિરણ્યનાભઃ સુતપાઃ પદ્મનાભઃ પ્રજાપતિઃ ॥૨૧॥
અમૃત્યુઃ સર્વદૃક્ સિંહઃ સન્ધાતા સન્ધિમાન્ સ્થિરઃ ।
અજો દુર્મર્ષણઃ શાસ્તા વિશ્રુતાત્મા સુરારિહા ॥૨૨॥
ગુરુર્ગુરુતમો ધામ સત્યઃ સત્યપરાક્રમઃ ।
નિમિષોઽનિમિષઃ સ્રગવી વાચસ્પતિરુદારધીઃ ॥૨૩॥
અગ્રણીર્ગ્રામણીઃ શ્રીમાન્ ન્યાયો નેતા સમીરણઃ ।
સહસ્રમૂર્ધા વિશ્વાત્મા સહસ્રાક્ષઃ સહસ્રપાત્ ॥૨૪॥
આવર્તનો નિવૃત્તાત્મા સંવૃતઃ સમ્પ્રમર્દનઃ ।
અહઃ સંવર્તકો વહ્નિરનિલો ધરણીધરઃ ॥૨૫॥
સુપ્રસાદઃ પ્રસન્નાત્મા વિશ્વધૃગ્વિશ્વભુગ્વિભુઃ ।
સત્કર્તા સત્કૃતઃ સાધુર્જહ્નુર્નારાયણો નરઃ ॥૨૬॥
અસંખ્યેયોઽપ્રમેયાત્મા વિશિષ્ટઃ શિષ્ટકૃચ્છુચિઃ ।
સિદ્ધાર્થઃ સિધ્ધસઙ્કલ્પઃ સિદ્ધિદઃ સિધ્ધિસાધનઃ ॥૨૭॥
વૃષાહી વૃષભો વિષ્ણુર્વૃષપર્વા વૃષોદરઃ ।
વર્ધનો વર્ધમાનશ્ચ વિવિક્તઃ શ્રુતિસાગરઃ ॥૨૮॥
સુભુજો દુર્ધરો વાગ્મી મહેન્દ્રો વસુદો વસુઃ ।
નૈકરૂપો બૃહદ્રૂપઃ શિપિવિષ્ટઃ પ્રકાશનઃ ॥૨૯॥
ઓજસ્તેજોદ્યુતિધરઃ પ્રકાશાત્મા પ્રતાપનઃ ।
ઋદ્ધઃ સ્પષ્ટાક્ષરો મન્ત્રશ્ચન્દ્રાંશુર્ભાસ્કરદ્યુતિઃ ॥૩૦॥

અમૃતાંશૂદ્ભવો ભાનુઃ શશવિન્દુઃ સુરેશ્વરઃ ।
ઔષધં જગતઃ સેતુઃ સત્યધર્મપરાક્રમઃ ॥૩૧॥
ભૂતભવ્યભવન્નાથઃ પવનઃ પાવનોઽનલઃ ।
કામહા કામકૃત્ કાન્તઃ કામઃ કામપ્રદઃ પ્રભુઃ ॥૩૨॥
યુગાદિકૃદ્યુગાવર્તો નૈકમાયો મહાશનઃ ।
અદૃશ્યોઽવ્યક્તરૂપશ્ચ સહસ્રજિદનન્તજિત્ ॥૩૩॥
ઈષ્ટો વિશિષ્ટઃ શિષ્ટેષ્ટઃ શિખણ્ડી નહૂષો વૃષઃ ।
ક્રોધહા ક્રોધકૃત્કર્તા વિશ્વબાહુર્મહીધરઃ ॥૩૪॥
અચ્યુતઃ પ્રથિતઃ પ્રાણઃ પ્રાણદો વાસવાનુજઃ ।
અપાંનિધિરધિષ્ઠાનમપ્રમત્તઃ પ્રતિષ્ઠિતઃ ॥૩૫॥
સ્કન્દઃ સ્કન્દધરો ધુર્યો વરદો વાયુવાહનઃ ।
વાસુદેવો બૃહદ્ભાનુરાદિદેવઃ પુરન્દરઃ ॥૩૬॥
અશોકસ્તારણસ્તારઃ શૂરઃ શૌરિર્જનેશ્વરઃ ।
અનુકૂલઃ શતાવર્તઃ પદ્મી પદ્મનિભેક્ષણઃ ॥૩૭॥
પદ્મનાભોઽરવિન્દાક્ષઃ પદ્મગર્ભઃ શરીરભૃત્ ।
મહર્ધ્ધિર્ઋદ્ધો વૃદ્ધાત્મા મહાક્ષો ગરુડધ્વજઃ ॥૩૮॥
અતુલઃ શરભો ભીમઃ સમયજ્ઞો હવિર્હરિઃ ।
સર્વલક્ષણલક્ષણ્યો લક્ષ્મીવાન્ સમિતિઞ્જયઃ ॥૩૯॥
વિક્ષરો રોહિતો માર્ગો હેતુર્દામોદરઃ સહઃ ।
મહીધરો મહાભાગો વેગવાનમિતાશનઃ ॥૪૦॥
ઉદ્ભવઃ ક્ષોભણો દેવઃ શ્રીગર્ભઃ પરમેશ્વરઃ ।
કરણં કારણં કર્તા વિકર્તા ગહનો ગુહઃ ॥૪૧॥
વ્યવસાયો વ્યવસ્થાનઃ સંસ્થાનઃ સ્થાનદો ધ્રુવઃ ।
પરર્દ્ધિઃ પરમસ્પષ્ટસ્તુષ્ટઃ પુષ્ટઃ શુભેક્ષણઃ ॥૪૨॥
રામો વિરામો વિરજો માર્ગો નેયો નયોઽનયઃ ।
વીરઃ શક્તિમતાં શ્રેષ્ઠો ધર્મો ધર્મવિદુત્તમઃ ॥૪૩॥

વૈકુણ્ઠઃ પુરુષઃ પ્રાણઃ પ્રાણદઃ પ્રણવઃ પૃથુઃ ।
હિરણ્યગર્ભઃ શત્રુઘ્નો વ્યાપ્તો વાયુરધોક્ષજઃ ॥૪૪॥
ઋતુઃ સુદર્શનઃ કાલઃ પરમેષ્ઠી પરિગ્રહઃ ।
ઉગ્રઃ સંવત્સરો દક્ષો વિશ્રામો વિશ્વદક્ષિણઃ ॥૪૫॥
વિસ્તારઃ સ્થાવરઃ સ્થાણુઃ પ્રમાણં બીજમવ્યયમ્ ।
અર્થોનર્થો મહાકોશો મહાભોગો મહાધનઃ ॥૪૬॥
અનિર્વિણ્ણઃ સ્થવિષ્ઠોભૂર્ધર્મયૂપો મહામખઃ ।
નક્ષત્રનેમિર્નક્ષત્રી ક્ષમઃ ક્ષામઃ સમીહનઃ ॥૪૭॥
યજ્ઞ ઈજ્યો મહેજ્યશ્ચ ક્રતુઃ સત્રં સતાંગતિઃ ।
સર્વદર્શી વિમુક્તાત્મા સર્વજ્ઞો જ્ઞાનમુત્તમમ્ ॥૪૮॥
સુવ્રતઃ સુમુખઃ સૂક્ષ્મઃ સુઘોષઃ સુખદઃ સુહૃત્ ।
મનોહરો જિતક્રોધો વીરબાહુર્વિદારણઃ ॥૪૯॥
સ્વાપનઃ સ્વવશો વ્યાપી નૈકાત્મા નૈકકર્મકૃત્ ।
વત્સરો વત્સલો વત્સી રત્નગર્ભો ધનેશ્વરઃ ॥૫૦॥
ધર્મગુબ્ધર્મકૃદ્ધર્મી સદસત્ક્ષરમક્ષરમ્ ।
અવિજ્ઞાતા સહસ્રાંશુર્વિધાતા કૃતલક્ષણઃ ॥૫૧॥
ગભસ્તિનેમિઃ સત્ત્વસ્થઃ સિંહો ભૂતમહેશ્વરઃ ।
આદિદેવો મહાદેવો દેવેશો દેવભૃદ્ગુરુઃ ॥૫૨॥
ઉત્તરો ગોપતિર્ગોપ્તા જ્ઞાનગમ્યઃ પુરાતનઃ ।
શરીરભૂતભૃદ્ભોક્તા કપીન્દ્રો ભૂરિદક્ષિણઃ ॥૫૩॥
સોમપોઽમૃતપઃ સોમઃ પુરુજિત્પુરુસત્તમઃ ।
વિનયો જયઃ સત્યસન્ધો દાશાર્હઃ સાત્વતાં પતિઃ ॥૫૪।
જીવો વિનયિતા સાક્ષી મુકુન્દોઽમિતવિક્રમઃ ।
અમ્ભોનિધિરનન્તાત્મા મહોદધિશયોઽન્તકઃ ॥૫૫॥
અજો મહાર્હઃ સ્વાભાવ્યો જિતામિત્રઃ પ્રમોદનઃ ।
આનન્દો નન્દનો નન્દઃ સત્યધર્મા ત્રિવિક્રમઃ ॥૫૬॥

મહર્ષિઃ કપિલાચાર્ય કૃતજ્ઞો મેદિનીપતિઃ ।
ત્રિપદસ્ત્રિદશાધ્યક્ષો મહાશૃઙ્ગઃ કૃતાન્તકૃત્ ॥૫૭॥
મહાવરાહો ગોવિન્દઃ સુષેણઃ કનકાઙ્ગદી ।
ગુહ્યો ગભીરો ગહનો ગુપ્તશ્ચક્રગદાધરઃ ॥૫૮॥
વેધાઃ સ્વાઙ્ગોજિતઃ કૃષ્ણો દૃઢઃ સઙ્કર્ષણોચ્યુતઃ ।
વરુણો વારુણો વૃક્ષઃ પુષ્કરાક્ષો મહામનાઃ ॥૫૯॥
ભગવાન્ ભગહા નન્દી વનમાલી હલાયુધઃ ।
આદિત્યો જ્યોતિરાદિત્યઃ સહિષ્ણુર્ગતિસત્તમઃ ॥૬૦॥
સુધન્વા ખણ્ડપરશુર્દારુણો દ્રવિણપ્રદઃ ।
દિવિસ્પૃક્ સર્વદૃગ્વ્યાસો વાચસ્પતિરયોનિજઃ ॥૬૧॥
ત્રિસામા સામગઃ સામ નિર્વાણં ભેષજં ભિષક્ ।
સંન્યાસકૃચ્છમઃ શાન્તો નિષ્ઠા શાન્તિઃ પરાયણઃ ॥૬૨।
શુભાઙ્ગઃ શાન્તિદઃ સ્રષ્ટા કુમુદઃ કુવલેશયઃ ।
ગોહિતો ગોપતિર્ગોપ્તા વૃષભાક્ષો વૃષપ્રિયઃ ॥૬૩॥
અનિવર્તી નિવૃત્તાત્મા સંક્ષેપ્તા ક્ષેમકૃચ્છિવઃ ।
શ્રીવત્સવક્ષાઃ શ્રીવાસઃ શ્રીપતિઃ શ્રીમતાંવરઃ ॥૬૪॥
શ્રીદઃ શ્રીશઃ શ્રીનિવાસઃ શ્રીનિધિઃ શ્રીવિભાવનઃ ।
શ્રીધરઃ શ્રીકરઃ શ્રેયઃ શ્રીમાઁલ્લોકત્રયાશ્રયઃ ॥૬૫॥
સ્વક્ષઃ સ્વઙ્ગઃ શતાનન્દો નન્દિર્જ્યોતિર્ગણેશ્વરઃ ।
વિજિતાત્મા વિધેયાત્મા સત્કીર્તિશ્છિન્નસંશયઃ ॥૬૬॥
ઉદીર્ણઃ સર્વતશ્ચક્ષુરનીશઃ શાશ્વતઃ સ્થિરઃ ।
ભૂશયો ભૂષણો ભૂતિર્વિશોકઃ શોકનાશનઃ ॥૬૭॥
અર્ચિષ્માનર્ચિતઃ કુમ્ભો વિશુદ્ધાત્મા વિશોધનઃ ।
અનિરુદ્ધોપ્રતિરથઃ પ્રદ્યુમ્નોમિતવિક્રમઃ ॥૬૮॥
કાલનેમિનિહા વીરઃ શૂરઃ શૌરિર્જનેશ્વરઃ ।
ત્રિલોકાત્મા ત્રિલોકેશઃ કેશવઃ કેશિહા હરિઃ ॥૬૯॥

કામદેવઃ કામપાલઃ કામી કાન્તઃ કૃતાગમઃ ।
અનિર્દેશ્યવપુર્વિષ્ણુર્વીરોનન્તો ધનઞ્જય : ॥૭૦॥
બ્રહ્મણ્યો બ્રહ્મકૃદ્ બ્રહ્મા બ્રહ્મ બ્રહ્મવિવર્ધનઃ ।
બ્રહ્મવિદ્ બ્રાહ્મણો બ્રહ્મી બ્રહ્મજ્ઞો બ્રાહ્મણપ્રિયઃ ॥૭૧॥
મહાક્રમો મહાકર્મા મહાતેજો મહોરગઃ ।
મહાક્રતુર્મહાયજ્વા મહાયજ્ઞો મહાહવિઃ ॥૭૨॥
સ્તવ્યઃ સ્તવપ્રિયઃ સ્તોત્રં સ્તુતિઃ સ્તોતા રણપ્રિયઃ ।
પૂર્ણઃ પૂરયિતા પુણ્યઃ પુણ્યકીર્તિરનામયઃ ॥૭૩॥
મનોજવસ્તીર્થકરો વસુરેતા વસુપ્રદઃ ।
વસુપ્રદો વાસુદેવો વસુર્વસુમના હવિઃ ॥૭૪॥
સદ્ગતિઃ સત્કૃતિઃ સત્તા સદ્ભૂતિઃ સત્પરાયણઃ ।
શૂરસેનો યદુશ્રેષ્ઠઃ સન્નિવાસઃ સુયામુનઃ ॥૭૫॥
ભૂતાવાસો વાસુદેવઃ સર્વાસુનિલયોનલઃ ।
દર્પહા દર્પદો દૃપ્તો દુર્ધરોથાપરાજિતઃ ॥૭૬॥
વિશ્વમૂર્તિર્મહામૂર્તિર્દીપ્તમૂર્તિરમૂર્તિમાન્ ।
અનેકમૂર્તિરવ્યક્તઃ શતમૂર્તિઃ શતાનનઃ ॥૭૭॥
એકો નૈકઃ સવઃ કઃ કિં યત્તત્પદમનુત્તમમ્ ।
લોકબન્ધુર્લોકનાથો માધવો ભક્તવત્સલઃ ॥૭૮॥
સુવર્ણવર્ણો હેમાઙ્ગો વરાઙ્ગશ્ચન્દનાઙ્ગદી ।
વીરહા વિષમઃ શૂન્યો ઘૃતાશીરચલશ્ચલઃ ॥૭૯॥
અમાની માનદો માન્યો લોકસ્વામી ત્રિલોકધૃક્ ।
સુમેધા મેધજો ધન્યઃ સત્યમેધા ધરાધરઃ ॥૮૦॥
તેજોવૃષો દ્યુતિધરઃ સર્વશસ્ત્રભૃતાં વરઃ ।
પ્રગ્રહો નિગ્રહો વ્યગ્રો નૈકશ્રૃઙ્ગો ગદાગ્રજઃ ॥૮૧॥
ચતુર્મૂર્તિશ્ચતુર્બાહુશ્ચતુર્વ્યૂહશ્ચતુર્ગતિઃ ।
ચતુરાત્મા ચતુર્ભાવશ્ચતુર્વેદવિદેકપાત્ ॥૮૨॥

સમાવર્તો નિવૃત્તાત્મા દુર્જયો દુરતિક્રમઃ ।
દુર્લભો દુર્ગમો દુર્ગો દુરાવાસો દુરારિહા ॥૮૩॥
શુભાઙ્ગો લોકસારઙ્ગઃ સુતન્તુસ્તન્તુવર્ધનઃ ।
ઈન્દ્રકર્મા મહાકર્મા કૃતકર્મા કૃતાગમઃ ॥૮૪॥
ઉદ્ભવઃ સુન્દરઃ સુન્દો રત્નનાભઃ સુલોચનઃ ।
અર્કો વાજસનઃ શૃઙ્ગી જયન્તઃ સર્વવિજ્જયી ॥૮૫॥
સુવર્ણબિન્દુરક્ષોભ્યઃ સર્વવાગીશ્વરેશ્વરઃ ।
મહાહ્રદો મહાગર્તો મહાભૂતો મહાનિધિઃ ॥૮૬॥
કુમુદઃ કુન્દરઃ કુન્દઃ પર્જન્યઃ પાવનોઽનલઃ ।
અમૃતાંશોઽમૃતવપુઃ સર્વજ્ઞઃ સર્વતોમુખઃ ॥૮૭॥
સુલભઃ સુવ્રતઃ સુદ્ધઃ શત્રુજિચ્છત્રુતાપનઃ ।
ન્યગ્રોધોદુમ્બરોશ્વત્થશ્ચાણૂરાન્ધ્રનિષૂદનઃ ॥૮૮॥
સહસ્રાર્ચિઃ સપ્તજિહ્વઃ સપ્તૈધાઃ સપ્તવાહનઃ ।
અમૂર્તિરનઘોચિન્ત્યો ભયકૃદ્ભયનાશનઃ ॥૮૯॥
અણુર્બૃહત્કૃશઃ સ્થૂલો ગુણભૃન્નિર્ગુણો મહાન્ ।
અધૃતઃ સ્વધૃતઃ સ્વાસ્યઃ પ્રાગ્વંશો વંશવર્ધનઃ ॥૯૦।
ભારભૃત્ કથિતો યોગી યોગીશઃ સર્વકામદઃ ।
આશ્રમઃ શ્રમણઃ ક્ષામઃ સુપર્ણો વાયુવાહનઃ ॥૯૧।
ધનિર્ધરો ધનુર્વેદો દણ્ડો દમયિતા દમઃ ।
અપરાજિતઃ સર્વસહો નિયન્તા નિયમો યમઃ ॥૯૨।
સત્ત્વવાન્ સાત્વિકઃ સત્યઃ સત્યધર્મપરાયણઃ ।
અભિપ્રાયઃ પ્રિયાર્હોહઃ પ્રિયકૃત્ પ્રીતિવર્ધનઃ ।૯૩
વિહાયસગતિર્જ્યોતિઃ સુરુચિર્હુતભુગ્વિભુઃ ।
રવિર્વિરોચનઃ સૂર્યઃ સવિતા રવિલોચનઃ ॥૯૪॥
અનન્તો હુતભુગ્ભોક્તા સુખદો નૈકદોઽગ્રજઃ ।
અનિર્વિણ્ણઃ સદામર્ષી લોકાધિષ્ઠાનમદ્ભૂતઃ ॥૯૫॥

સનાત્સનાતનતમઃ કપિલઃ કપિરવ્યયઃ ।
સ્વસ્તિદઃ સ્વસ્તિકૃત્સ્વસ્તિસ્વતિભુક્સ્વસ્તિદક્ષિણઃ ॥
અરૌદ્રઃ કુણ્ડલી ચક્રી વિક્રમ્યૂર્જિતશાસનઃ ।
શબ્દાતિગઃ શબ્દસહઃ શિશિરઃ શર્વરીકરઃ ॥૯૭॥
અક્રૂરઃ પેશલો દક્ષો દક્ષિણઃ ક્ષમિણાં વરઃ ।
વિદ્વત્તમો વીતભયઃ પુણ્યશ્રવણકીર્તનઃ ॥૯૮॥
ઉત્તારણો દુષ્કૃતિહા પુણ્યો દુઃસ્વપ્નનાશનઃ ।
વીરહા રક્ષણઃ સન્તો જીવનઃ પર્યવસ્થિતઃ ॥૯૯॥
અનન્તરૂપોનન્તશ્રીર્જિતમન્યુર્ભયાપહઃ ।
ચતુરસ્રો ગભીરાત્મા વિદિશો વ્યાદિશો દિશઃ ॥૧૦૦
અનાદિર્ભૂર્ભુવો લક્ષ્મીઃ સુવીરો રુચિરાઙ્ગદઃ ।
જનનો જનજન્માદિર્ભીમો ભીમપરાક્રમઃ ॥૧૦૧॥
આધારનિલયો ધાતા પુષ્પહાસઃ પ્રજાગરઃ ।
ઉર્ધ્વગઃ સત્પથાચારઃ પ્રાણદઃ પ્રણવઃ પણઃ ॥૧૦૨॥
પ્રમાણં પ્રાણનિલયઃ પ્રાણભૃત્ પ્રાણજીવનઃ ।
તત્ત્વં તત્ત્વવિદેકાત્મા જન્મમૃત્યુજરાતિગઃ ॥૧૦૩॥
ભૂર્ભુવઃસ્વસ્તરુસ્તારઃ સવિતા પ્રપિતામહઃ ।
યજ્ઞો યજ્ઞપતિર્યજ્વા યજ્ઞાઙ્ગો યજ્ઞવાહનઃ ॥૧૦૪॥
યજ્ઞભૃદ્યજ્ઞકૃદ્યજ્ઞી યજ્ઞભુગ્યજ્ઞસાધનઃ ।
યજ્ઞાન્તકૃદ્યજ્ઞગુહ્યમન્નમન્નાદ એવ ચ ॥૧૦૫॥
આત્મયોનિઃ સ્વયંજાતો વૈખાનઃ સામગાયનઃ ।
દેવકીનન્દનઃ સ્રષ્ટા ક્ષિતીશઃ પાપનાશનઃ ॥૧૦૬॥
શઙ્ખભૃન્નન્દકી ચક્રી શાર્ઙ્ગધન્વા ગદાધરઃ ।
રથાઙ્ગપાણિરક્ષોભ્યઃ સર્વપ્રહરણાયુધઃ ॥૧૦૭॥

॥ શ્રી સર્વપ્રહરણાયુધ ૐ નમઃ ઈતિ ॥

ઈતીદં કીર્તનીયસ્ય કેશવસ્ય મહાત્મનઃ ।
નામ્નાં સહસ્રં દિવ્યાનામશેષેણ પ્રકીર્તિતમ્ ॥૧॥
ય ઈદં શૃણુયાન્નિત્યં યશ્ચાપિ પરિકીર્તયેત્ ।
નાશુભં પ્રાપ્નુયાત્ કિંચિત્સોઽમુત્રેહ ચ માનવઃ ॥૨॥
વેદાન્તગો બ્રાહ્મણઃ સ્યાત્ક્ષત્રિયો વિજયી ભવેત્ ।
વૈશ્યો ધનસમૃદ્ધઃ સ્યાચ્છૂદ્રઃ સુખમવાપ્નુયાત્ ॥૩॥
ધર્માર્થી પ્રાપ્નુયાદ્ધર્મમર્થાર્થી ચાર્થમાપ્નુયાત્ ।
કામાનવાપ્નુયાત્કામી પ્રજાર્થી પ્રાપ્નુયાત્પ્રજામ્ ॥૪॥
ભક્તિમાન્યઃ સદોત્થાય શુચિસ્તદ્ગતમાનસઃ ।
સહસ્રં વાસુદેવસ્ય નામ્નામેતત્પ્રકીર્તયેત્ ॥૫॥
યશઃ પ્રાપ્નોતિ વિપુલં જ્ઞાતિપ્રાધાન્યમેવ ચ ।
અચલાં શ્રિયમાપ્નોતિ શ્રેયઃ પ્રાપ્નોત્યનુત્તમમ્ ॥૬॥
ન ભયં ક્વચિદાપ્નોતિ વીર્યં તેજશ્ચ વિન્દતિ ।
ભવત્યરોગો દ્યુતિમાન્બલરૂપગુણાન્વિતઃ ॥૭॥
રોગાર્તો મુચ્યતે રોગાત્ બદ્ધો મુચ્યેત બન્ધનાત્ ।
ભયાન્મુચ્યેત ભીતસ્તુ મુચ્યેતાપન્ન આપદઃ ॥૮॥
દુર્ગાણ્યતિતરત્યાશુ પુરુષઃ પુરુષોત્તમમ્ ।
સ્તુવન્નામસહસ્રેણ નિત્યં ભક્તિસમન્વિતઃ ॥૯॥
વાસુદેવાશ્રયો મર્ત્યો વાસુદેવપરાયણઃ ।
સર્વપાપવિશુદ્ધાત્મા યાતિ બ્રહ્મ સનાતનમ્ ॥૧૦॥
ન વાસુદેવભક્તાનામશુભં વિદ્યતે ક્વચિત્ ।
જન્મમૃત્યુજરાવ્યાધિભયં નૈવોપજાયતે ॥૧૧॥
ઈમં સ્તવમધીયાનઃ શ્રદ્ધાભક્તિસમન્વિતઃ ।
યુજ્યેતાત્મા સુખક્ષાન્તિશ્રીધૃતિસ્મૃતિકીર્તિભિઃ ॥૧૨॥
ન ક્રોધો ન ચ માત્સર્યં ન લોભો નાશુભા મતિઃ ।
ભવન્તિ કૃતપુણ્યાનાં ભક્તાનાં પુરુષોત્તમે ॥૧૩॥
દ્યૌઃ સચન્દ્રાર્કનક્ષત્રા ખં દિશો ભૂર્મહોદધિઃ ।

વાસુદેવસ્ય વીર્યેણ વિધૃતાનિ મહાત્મનઃ ॥૧૪॥
સસુરાસુરગન્ધર્વં સયક્ષોરગરાક્ષસમ્ ।
જગદ્વશેવર્તતેદં કૃષ્ણસ્ય સચરાચરમ્ ॥૧૫॥
ઈન્દ્રિયાણિ મનો બુદ્ધિઃ સત્ત્વં તેજો બલં ધૃતિઃ ।
વાસુદેવાત્મકાન્યાહુઃ ક્ષેત્રં ક્ષેત્રજ્ઞ એવ ચ ॥૧૬॥
સર્વાગમાનામાચારઃ પ્રથમં પરિકલ્પતે ।
આચારપ્રભવો ધર્મો ધર્મસ્ય પ્રભુરચ્યુતઃ ॥૧૭॥
ઋષયઃ પિતરો દેવા મહાભૂતાનિ ધાતવઃ ।
જઙ્ગમાજઙ્ગમં ચેદં જગન્નારાયણોદ્ભવમ્ ॥૧૮॥
યોગો જ્ઞાનં તથા સાઙ્ખ્યં વિદ્યાઃ શિલ્પાદિકર્મ ચ ।
વેદાઃ શાસ્ત્રાણિ વિજ્ઞાનમેતત્સર્વં જનાર્દનાત્ ॥૧૯॥
એકો વિષ્ણુર્મહદ્ભૂતં પૃથગ્ભૂતાન્યનેકશઃ ।
ત્રીન્ લોકાન્ વ્યાપ્ય ભૂતાત્મા ભુંક્તે વિશ્વભુગવ્યયઃ ॥૨૦॥
ઈમં સ્તવં ભગવતો વિષ્ણોર્વ્યાસેન કીર્તિતમ્ ।
પઠેદ્ય ઈચ્છેત્પુરુષઃ શ્રેયઃ પ્રાપ્તું સુખાનિ ચ ॥૨૧॥
વિશ્વેશ્વરમજં દેવં જગતઃ પ્રભવાપ્યયમ્ ।
ભજન્તિ યે પુષ્કરાક્ષં ન તે યાન્તિ પરાભવમ્ ॥૨૨॥
પદ્મપત્રવિશાલાક્ષ ! પદ્મનાભ ! સુરોત્તમ ! ।
ભકતાનામનુરકતાનાં ત્રાતા ભવ જનાર્દન ! ॥૨૩॥
યો માં નામસહસ્રેણ સ્તોતુમિચ્છતિ પાણ્ડવ ।
તેન ચૈકેન શ્લોકેન સ્તુત એવ ન સંશયઃ ॥૨૪॥
નમોઽસ્ત્વનન્તાય સહસ્રમૂર્તયે, સહસ્રપાદાક્ષિશિરોરુબાહવે ।
સહસ્રનામ્ને પુરુષાય શાશ્વતે, સહસ્રકોટિયુગધારિણે નમઃ ॥૨૫
નમઃ કમલનાભાય નમસ્તે જલશાયિને ।
નમસ્તે કેશવાનન્ત ! વાસુદેવ ! નમોસ્તુ તે ॥૨૬॥
વાસનાદ્વાસુદેવસ્ય વાસિતં ભુવનત્રયમ્ ।
સર્વભૂતનિવાસોસિ વાસુદેવ ! નમોસ્તુ તે ॥૨૭॥
નમો બ્રહ્મણ્યદેવાય ગોબ્રાહ્મણહિતાય ચ ।
જગદ્ધિતાય કૃષ્ણાય ગોવિન્દાય નમો નમઃ ॥૨૮॥
આકાશાત્પતિતં તોયં યથા ગચ્છતિ સાગરમ્ ।
સર્વદેવનમસ્કારઃ કેશવં પ્રતિ ગચ્છતિ ॥૨૯॥
એષ નિષ્કણ્ટકઃ પન્થા યત્ર સમ્પૂજ્યતે હરિઃ ।
કુપથં તં વિજાનિયાદ્ ગોવિન્દરહિતાગમમ્ ॥૩૦॥
સર્વદેવેષુ યત્પુણ્યં સર્વતીર્થેષુ યત્ફલમ્ ।
તત્ફલં સમવાપ્નોતિ સ્તુત્વા દેવં જનાર્દનમ્ ॥૩૧॥
યો નરઃ પઠતે નિત્યં ત્રિકાલં કેશવાલયે ।
દ્વિકાલમેકકાલં વા ક્રૂરં સર્વં વ્યપોહતિ ॥૩૨॥
દહ્યન્તે રિપવસ્તસ્ય સૌમ્યાઃ સર્વે સદા ગ્રહાઃ ।
વિલીયન્તે ચ પાપાનિ સ્તવે હ્યસ્મિન્ પ્રકીર્તિતે ।
યેન ધ્યાતઃ શ્રુતો યેન યેનાયં પઠ્યતે સ્તવઃ ॥૩૩॥
દત્તાનિ સર્વદાનાનિ સુરાઃ સર્વે સમર્ચિતાઃ ।
ઈહ લોકે પરે વાપિ ન ભયં વિદ્યતે ક્વચિત્ ॥૩૪॥
નામ્નાં સહસ્રં યોધીતે દ્વાદશ્યાં મમ સન્નિધૌ ।
શનૈર્દહતિ પાપાનિ કલ્પકોટિશતાનિ ચ ॥૩૫॥
અશ્વત્થસન્નિધૌ પાર્થ ! તુલસીસન્નિધૌ તથા ।
પઠેન્નામસહસ્રં તુ ગવાં કોટિફલં લભેત્ ॥૩૬॥
શિવાલયે પઠેન્નિત્યં તુલસીવનસંસ્થિતઃ ।
નરો મુક્તિમવાપ્નોતિ ચક્રપાણેર્વચો યથા ।
બ્રહ્મહત્યાદિકં ઘોરં સર્વપાપં વિનશ્યતિ ॥૩૭॥
વનમાલી ગદી શાર્ઙ્ગી, શંખી ચક્રી ચ નંદકી ।
શ્રીમન્નારાયણો વિષ્ણુઃ વાસુદેવોભિરક્ષતુ ॥૩૮॥

Rr, ©erõ»ýtuŠŒÔPËnËú™t{M,tu°tk
≫ ËB.qýo{T ≫

## શ્રી વિષ્ણુ સહસ્ર નામાવલી

૧. ૐ વિશ્વસ્મૈ નમઃ
૨. ૐ વિષ્ણવે નમઃ
૩. ૐ વષટ્કારાય નમઃ
૪. ૐભૂતભવ્યભવત્પ્રભવે ન.
૫. ૐ ભૂતકૃતે નમઃ
૬. ૐ ભૂતભૃતે નમઃ
૭. ૐ ભાવાય નમઃ
૮. ૐ ભૂતાત્માને નમઃ
૯. ૐ ભૂતભાવનાય નમઃ
૧૦. ૐ પૂતાત્મને નમઃ
૧૧. ૐ પરમાત્મને નમઃ
૧૨. ૐમુક્તાનાંપરમાગતયે ન.
૧૩. ૐ અવ્યયાય નમઃ
૧૪. ૐ પુરુષાય નમઃ
૧૫. ૐ સાક્ષીણે નમઃ
૧૬. ૐ ક્ષેત્રજ્ઞાય નમઃ
૧૭. ૐ અક્ષરાય નમઃ
૧૮. ૐ યોગાય નમઃ
૧૯. ૐ યોગવિદાંનેત્રે નમઃ
૨૦. ૐ પ્રધાનપુરુષેશ્વરાય નમઃ
૨૧. ૐ નારસિંહવપુષે નમઃ
૨૨. ૐ શ્રીમતે નમઃ
૨૩. ૐ કેશવાય નમઃ
૨૪. ૐ પુરુષોત્તમાય નમઃ
૨૫. ૐ સર્ગાય નમઃ
૨૬. ૐ શર્વાય નમઃ
૨૭. ૐ શિવાય નમઃ
૨૮. ૐ સ્થાણવે નમઃ
૨૯. ૐ ભૂતાદયે નમઃ
૩૦. ૐ નિધયે અવ્યયાય નમઃ
૩૧. ૐ સંભવાય નમઃ
૩૨. ૐ ભાવનાય નમઃ
૩૩. ૐ ભર્ત્રે નમઃ
૩૪. ૐ પ્રભવાય નમઃ
૩૫. ૐ પ્રભવે નમઃ
૩૬. ૐ ઈશ્વરાય નમઃ
૩૭. ૐ સ્વયંભુવે નમઃ
૩૮. ૐ શંભવે નમઃ
૩૯. ૐ આદિત્યાય નમઃ
૪૦. ૐ પુષ્કરાક્ષાય નમઃ
૪૧. ૐ મહાસ્વનાય નમઃ
૪૨. ૐ અનાદિનિધનાય નમઃ
૪૩. ૐ ધાત્રે નમઃ
૪૪. ૐ વિધાત્રે નમઃ
૪૫. ૐ ધાતુરુત્તમાય નમઃ
૪૬. ૐ અપ્રમેયાય નમઃ
૪૭. ૐ હૃષીકેશાય નમઃ
૪૮. ૐ પદ્મનાભાય નમઃ
૪૯. ૐ અમરપ્રભવે નમઃ
૫૦. ૐ વિશ્વકર્મણે નમઃ
૫૧. ૐ મનવે નમઃ
૫૨. ૐ ત્વષ્ટ્રે નમઃ
૫૩. ૐ સ્થવિષ્ઠાય નમઃ
૫૪. ૐ સ્થવિરાય નમઃ
૫૫. ૐ ધ્રુવાય નમઃ
૫૬. ૐ અગ્રાહ્યાય નમઃ
૫૭. ૐ શાશ્વતાય નમઃ
૫૮. ૐ કૃષ્ણાય નમઃ
૫૯. ૐ લોહિતાક્ષાય નમઃ
૬૦. ૐ પ્રતર્દનાય નમઃ
૬૧. ૐ પ્રભૂતાય નમઃ
૬૨. ૐ સ્રિકકુબ્ધામ્ને નમઃ
૬૩. ૐ પવિત્રાય નમઃ
૬૪. ૐ મઙ્ગલાય પરસ્મૈ નમઃ
૬૫. ૐ ઈશાનાય નમઃ
૬૬. ૐ પ્રાણદાય નમઃ
૬૭. ૐ પ્રાણાય નમઃ
૬૮. ૐ જ્યેષ્ઠાય નમઃ
૬૯. ૐ શ્રેષ્ઠાય નમઃ
૭૦. ૐ પ્રજાપતયે નમઃ
૭૧. ૐ હિરણ્યગર્ભાય નમઃ
૭૨. ૐ ભૂગર્ભાય નમઃ
૭૩. ૐ માધવાય નમઃ
૭૪. ૐ મધુસૂદનાય નમઃ
૭૫. ૐ ઈશ્વરાય નમઃ
૭૬. ૐ વિક્રમિણે નમઃ
૭૭. ૐ ધન્વિને નમઃ
૭૮. ૐ મેધાવિને નમઃ
૭૯. ૐ વિક્રમાય નમઃ
૮૦. ૐ ક્રમાય નમઃ
૮૧. ૐ અનુત્તમાય નમઃ
૮૨. ૐ દુરાધર્ષાય નમઃ
૮૩. ૐ કૃતજ્ઞાય નમઃ
૮૪. ૐ કૃતયે નમઃ
૮૫. ૐ આત્મવતે નમઃ
૮૬. ૐ સુરેશાય નમઃ
૮૭. ૐ શરણાય નમઃ
૮૮. ૐ શર્મણે નમઃ
૮૯. ૐ વિશ્વરેતસે નમઃ
૯૦. ૐ પ્રજાભવાય નમઃ
૯૧. ૐ અહ્ને નમઃ
૯૨. ૐ સંવત્સરાય નમઃ
૯૩. ૐ વ્યાલાય નમઃ
૯૪. ૐ પ્રત્યયાય નમઃ
૯૫. ૐ સર્વદર્શનાય નમઃ
૯૬. ૐ અજાય નમઃ
૯૭. ૐ સર્વેશ્વરાય નમઃ
૯૮. ૐ સિદ્ધાય નમઃ
૯૯. ૐ સિધ્ધયે નમઃ
૧૦૦. ૐ સર્વાદયે નમઃ
૧૦૧. ૐ અચ્યુતાય નમઃ
૧૦૨. ૐ વૃષાકપયે નમઃ
૧૦૩. ૐ અમેયાત્મને નમઃ
૧૦૪. ૐસર્વયોગવિનિઃસૃતાય.
૧૦૫. ૐ વસવે નમઃ
૧૦૬. ૐ વસુમનસે નમઃ
૧૦૭. ૐ સત્યાય નમઃ
૧૦૮. ૐ સમાત્મને નમઃ
૧૦૯. ૐ સમ્મિતાય નમઃ
૧૧૦. ૐ સમાય નમઃ
૧૧૧. ૐ અમોઘાય નમઃ
૧૧૨. ૐ પુણ્ડરીકાક્ષાય નમઃ
૧૧૩. ૐ વૃષકર્મણે નમઃ
૧૧૪. ૐ વૃષાકૃતયે નમઃ
૧૧૫. ૐ રુદ્રાય નમઃ
૧૧૬. ૐ બહુશિરસે નમઃ
૧૧૭. ૐ બભ્રવે નમઃ
૧૧૮. ૐ વિશ્વયોનયે નમઃ
૧૧૯. ૐ શુચિશ્રવસે નમઃ
૧૨૦. ૐ અમૃતાય નમઃ
૧૨૧. ૐ શાશ્વતસ્થાણવે નમઃ
૧૨૨. ૐ વરારોહાય નમઃ
૧૨૩. ૐ મહાતપસે નમઃ

૧૨૪. ૐ સર્વગાય નમઃ
૧૨૫. ૐ સર્વવિદે નમઃ
૧૨૬. ૐ ભાનવે નમઃ
૧૨૭. ૐ વિષ્વક્સેનાય નમઃ
૧૨૮. ૐ જનાર્દનાય નમઃ
૧૨૯. ૐ વેદાય નમઃ
૧૩૦. ૐ વેદવિદે નમઃ
૧૩૧. ૐ અવ્યઙ્ગાય નમઃ
૧૩૨. ૐ વેદાઙ્ગાય નમઃ
૧૩૩. ૐ વેદવિદે નમઃ
૧૩૪. ૐ કવયે નમઃ
૧૩૫. ૐ લોકાધ્યક્ષાય નમઃ
૧૩૬. ૐ સુરાધ્યક્ષાય નમઃ
૧૩૭. ૐ ધર્માધ્યક્ષાય નમઃ
૧૩૮. ૐ કૃતાકૃતાય નમઃ
૧૩૯. ૐ ચતુરાત્મને નમઃ
૧૪૦. ૐ ચતુર્વ્યૂહાય નમઃ
૧૪૧. ૐ ચતુર્દંષ્ટ્રાય નમઃ
૧૪૨. ૐ ચતુર્ભુજાય નમઃ
૧૪૩. ૐ ભ્રાજિષ્ણવે નમઃ
૧૪૪. ૐ ભોજનાય નમઃ
૧૪૫. ૐ ભોક્ત્રે નમઃ
૧૪૬. ૐ સહિષ્ણવે નમઃ
૧૪૭. ૐ જગદાદિજાય નમઃ
૧૪૮. ૐ અનઘાય નમઃ
૧૪૯. ૐ વિજયાય નમઃ
૧૫૦. ૐ જેત્રે નમઃ
૧૫૧. ૐ વિશ્વયોનયે નમઃ
૧૫૨. ૐ પુનર્વસવે નમઃ
૧૫૩. ૐ ઉપેન્દ્રાય નમઃ
૧૫૪. ૐ વામનાય નમઃ
૧૫૫. ૐ પાંશવે નમઃ
૧૫૬. ૐ અમોઘાય નમઃ
૧૫૭. ૐ શુચયે નમઃ
૧૫૮. ૐ ઉર્જીતાય નમઃ
૧૫૯. ૐ અતીન્દ્રાય નમઃ
૧૬૦. ૐ સંગ્રહાય નમઃ
૧૬૧. ૐ સર્ગાય નમઃ
૧૬૨. ૐ ધૃતાત્મને નમઃ
૧૬૩. ૐ નિયમાય નમઃ
૧૬૪. ૐ યમાય નમઃ
૧૬૫. ૐ વેદ્યાય નમઃ
૧૬૬. ૐ વૈદ્યાય નમઃ
૧૬૭. ૐ સદાયોગિને નમઃ
૧૬૮. ૐ વીરઘ્ને નમઃ
૧૬૯. ૐ માધવાય નમઃ
૧૭૦. ૐ મધવે નમઃ
૧૭૧. ૐ અતીન્દ્રિયાય નમઃ
૧૭૨. ૐ મહામાયાય નમઃ
૧૭૩. ૐ મહોત્સાહાય નમઃ
૧૭૪. ૐ મહાબલાય નમઃ
૧૭૫. ૐ મહાબુદ્ધયે નમઃ
૧૭૬. ૐ મહાવીર્યાય નમઃ
૧૭૭. ૐ મહાશક્તયે નમઃ
૧૭૮. ૐ મહાદ્યુતયે નમઃ
૧૭૯. ૐ અનિર્દેશ્યવપુષે નમઃ
૧૮૦. ૐ શ્રીમતે નમઃ
૧૮૧. ૐ અમેયાત્મને નમઃ
૧૮૨. ૐ મહાદ્રિધૃગે નમઃ
૧૮૩. ૐ મહેષ્વાસાય નમઃ
૧૮૪. ૐ મહીભર્ત્રે નમઃ
૧૮૫. ૐ શ્રીનિવાસાય નમઃ
૧૮૬. ૐ સતાં ગતયે નમઃ
૧૮૭. ૐ અનિરુદ્ધાય નમઃ
૧૮૮. ૐ સુરાનન્દાય નમઃ
૧૮૯. ૐ ગોવિન્દાય નમઃ
૧૯૦. ૐ ગોવિન્દાંપતયે નમઃ
૧૯૧. ૐ મરીચયે નમઃ
૧૯૨. ૐ દમનાય નમઃ
૧૯૩. ૐ હંસાય નમઃ
૧૯૪. ૐ સુપર્ણાય નમઃ
૧૯૫. ૐ ભુજગોત્તમાય નમઃ
૧૯૬. ૐ હિરણ્યનાભાય નમઃ
૧૯૭. ૐ સુતપસે નમઃ
૧૯૮. ૐ પદ્મનાભાય નમઃ
૧૯૯. ૐ પ્રજાપતયે નમઃ
૨૦૦. ૐ અમૃત્યવે નમઃ
૨૦૧. ૐ સર્વદશે નમઃ
૨૦૨. ૐ સિંહાય નમઃ
૨૦૩. ૐ સન્ધાત્રે નમઃ
૨૦૪. ૐ સન્ધિમતે નમઃ
૨૦૫. ૐ સ્થિરાય નમઃ
૨૦૬. ૐ અજાય નમઃ
૨૦૭. ૐ દુર્મર્ષણાય નમઃ
૨૦૮. ૐ શાસ્ત્રે નમઃ
૨૦૯. ૐ વિશ્રુતાત્મને નમઃ
૨૧૦. ૐ સુરારિઘ્ને નમઃ
૨૧૧. ૐગુરવે ગુરુતમાય નમઃ
૨૧૨. ૐ ધામ્ને નમઃ
૨૧૩. ૐ સત્યાય નમઃ
૨૧૪. ૐ સત્ય પરાક્રમાય નમઃ
૨૧૫. ૐ નિમિષાય નમઃ
૨૧૬. ૐ અનિમિષાય નમઃ
૨૧૭. ૐ સ્રગ્વિણે નમઃ
૨૧૮. ૐ વાચસ્પતયે નમઃ
૨૧૯. ૐ ઉદારધિયે નમઃ
૨૨૦. ૐ અગ્રણ્યે નમઃ
૨૨૧. ૐ ગ્રામણે નમઃ
૨૨૨. ૐ શ્રીમતે નમઃ
૨૨૩. ૐ ન્યાયાય નમઃ
૨૨૪. ૐ નેત્રે નમઃ
૨૨૫. ૐ સમીરણાય નમઃ
૨૨૬. ૐ સહસ્રમૂર્ધ્ને નમઃ
૨૨૭. ૐ વિશ્વાત્મને નમઃ
૨૨૮. ૐ સહસ્રાક્ષાય નમઃ
૨૨૯. ૐ સહસ્રપદે નમઃ
૨૩૦. ૐ આવર્તનાય નમઃ
૨૩૧. ૐ નિવૃત્તાત્મને નમઃ
૨૩૨. ૐ સંવૃતાય નમઃ
૨૩૩. ૐ સમ્પ્રમર્દનાય નમઃ
૨૩૪. ૐ અહઃ સંવર્તકાય નમઃ
૨૩૫. ૐ વહ્નયે નમઃ
૨૩૬. ૐ અનિલાય નમઃ
૨૩૭. ૐ ધરણીધરાય નમઃ
૨૩૮. ૐ સુપ્રસાદાય નમઃ
૨૩૯. ૐ પ્રસન્નાત્મને નમઃ
૨૪૦. ૐ વિશ્વધકે નમઃ
૨૪૧. ૐ વિશ્વભુગ્વિભવે નમઃ
૨૪૨. ૐ સત્કત્રે નમઃ
૨૪૩. ૐ સત્કૃતાય નમઃ
૨૪૪. ૐ સાધવે નમઃ
૨૪૫. ૐ જહ્નવે નમઃ
૨૪૬. ૐ નારાયણાય નમઃ
૨૪૭. ૐ નરાય નમઃ

૨૪૮. ૐ અસંખ્યેયાય નમઃ
૨૪૯. ૐ અપ્રમેયાત્મને નમઃ
૨૫૦. ૐ વિશિષ્ટાય નમઃ
૨૫૧. ૐ શિષ્ટકૃતે નમઃ
૨૫૨. ૐ શુચયે નમઃ
૨૫૩. ૐ સિદ્ધાર્થાય નમઃ
૨૫૪. ૐ સિધ્ધસઙ્કલ્પાય નમઃ
૨૫૫. ૐ સિદ્ધિદાય નમઃ
૨૫૬. ૐ સિધ્ધિસાધનાય નમઃ
૨૫૭. ૐ વૃષાહિણે નમઃ
૨૫૮. ૐ વૃષભાય નમઃ
૨૫૯. ૐ વિષ્ણવે નમઃ
૨૬૦. ૐ વૃષપર્વણે નમઃ
૨૬૧. ૐ વૃષોદરાય નમઃ
૨૬૨. ૐ વર્ધનાય નમઃ
૨૬૩. ૐ વર્ધમાનાય નમઃ
૨૬૪. ૐ વિવિક્તાય નમઃ
૨૬૫. ૐ શ્રુતિસાગરાય નમઃ
૨૬૬. ૐ સુભુજાય નમઃ
૨૬૭. ૐ દુર્ધરાય નમઃ
૨૬૮. ૐ વાગ્મિને નમઃ
૨૬૯. ૐ મહેન્દ્રાય નમઃ
૨૭૦. ૐ વસુદાય નમઃ
૨૭૧. ૐ વસવે નમઃ
૨૭૨. ૐ નૈકરૂપાય નમઃ
૨૭૩. ૐ બૃહદ્રૂપાય નમઃ
૨૭૪. ૐ શિપિવિષ્ટાય નમઃ
૨૭૫. ૐ પ્રકાશનાય નમઃ
૨૭૬. ૐ ઓજસ્તેજોદ્યુતિધરાય
૨૭૭. ૐ પ્રકાશાત્મને નમઃ
૨૭૮. ૐ પ્રતાપનાય નમઃ
૨૭૯. ૐ ઋદ્ધાય નમઃ
૨૮૦. ૐ સ્પષ્ટાક્ષરાય નમઃ
૨૮૧. ૐ મન્ત્રાય નમઃ
૨૮૨. ૐ ચન્દ્રાંશવે નમઃ
૨૮૩. ૐ ભાસ્કરદ્યુતયે નમઃ
૨૮૪. ૐ અમૃતાંશૂદ્ભવાય નમઃ
૨૮૫. ૐ ભાનવે નમઃ
૨૮૬. ૐ શશબિન્દવે નમઃ
૨૮૭. ૐ સુરેશ્વરાય નમઃ
૨૮૮. ૐ ઔષધાય નમઃ
૨૮૯. ૐ જગતઃ સેતવે નમઃ
૨૯૦. ૐસત્યધર્મપરાક્રમાય.
૨૯૧. ૐભૂતભવ્યભવન્નાથાય.
૨૯૨. ૐ પવનાય નમઃ
૨૯૩. ૐ પાવનાય નમઃ
૨૯૪. ૐ અનલાય નમઃ
૨૯૫. ૐ કામઘ્ને નમઃ
૨૯૬. ૐ કામકૃતે નમઃ
૨૯૭. ૐ કાન્તાય નમઃ
૨૯૮. ૐ કામાય નમઃ
૨૯૯. ૐ કામપ્રદાય નમઃ
૩૦૦. ૐ પ્રભવે નમઃ
૩૦૧. ૐ યુગાદિકૃતે નમઃ
૩૦૨. ૐ યુગાવર્તાય નમઃ
૩૦૩. ૐ નૈકમાયાય નમઃ
૩૦૪. ૐ મહાશનાય નમઃ
૩૦૫. ૐ અદશ્યાય નમઃ
૩૦૬. ૐ અવ્યક્તરૂપાય નમઃ
૩૦૭. ૐ સહસ્રજિતે નમઃ
૩૦૮. ૐ અનન્તજિતે નમઃ
૩૦૯. ૐ ઈષ્ટાય નમઃ
૩૧૦. ૐ વિશિષ્ટાય નમઃ
૩૧૧. ૐ શિષ્ટેષ્ટાય નમઃ
૩૧૨. ૐ શિખણ્ડિ નમઃ
૩૧૩. ૐ નહૂષાય નમઃ
૩૧૪. ૐ વૃષભાય નમઃ
૩૧૫. ૐ ક્રોધઘ્ને નમઃ
૩૧૬. ૐ ક્રોધકૃતે નમઃ
૩૧૭. ૐ ક્રોધકૃત્કર્ત્રે નમઃ
૩૧૮. ૐ વિશ્વબાહવે નમઃ
૩૧૯. ૐ મહિધરાય નમઃ
૩૨૦. ૐ અચ્યુતાય નમઃ
૩૨૧. ૐ પ્રથિતાય નમઃ
૩૨૨. ૐ પ્રાણાય નમઃ
૩૨૩. ૐ પ્રાણદાય નમઃ
૩૨૪. ૐ વાસવાનુજાય નમઃ
૩૨૫. ૐ અપાંનિધયે નમઃ
૩૨૬. ૐ અધિષ્ઠાનાય નમઃ
૩૨૭. ૐ અપ્રમત્તાય નમઃ
૩૨૮. ૐ પ્રતિષ્ઠિતાય નમઃ
૩૨૯. ૐ સ્કન્દાય નમઃ
૩૩૦. ૐ સ્કન્દધરાય નમઃ
૩૩૧. ૐ ધુર્યાય નમઃ
૩૩૨. ૐ વરદાય નમઃ
૩૩૩. ૐ વાયુવાહનાય નમઃ
૩૩૪. ૐ વાસુદેવાય નમઃ
૩૩૫. ૐ બૃહદ્ભાનવે નમઃ
૩૩૬. ૐ આદિદેવાય નમઃ
૩૩૭. ૐ પુરન્દરાય નમઃ
૩૩૮. ૐ અશોકાય નમઃ
૩૩૯. ૐ તારણાય નમઃ
૩૪૦. ૐ તારાય નમઃ
૩૪૧. ૐ શૂરાય નમઃ
૩૪૨. ૐ શૌરયે નમઃ
૩૪૩. ૐ જનેશ્વરાય નમઃ
૩૪૪. ૐ અનુકૂલાય નમઃ
૩૪૫. ૐ શતાવર્તાય નમઃ
૩૪૬. ૐ પદ્મિને નમઃ
૩૪૭. ૐ પદ્મનિભેક્ષણાય નમઃ
૩૪૮. ૐ પદ્મનાભાય નમઃ
૩૪૯. ૐ અરવિન્દાક્ષાય નમઃ
૩૫૦. ૐ પદ્મગર્ભાય નમઃ
૩૫૧. ૐ શરીરભૃતે નમઃ
૩૫૨. ૐ મહર્દ્ધયે નમઃ
૩૫૩. ૐ ઋદ્ધાય નમઃ
૩૫૪. ૐ વૃદ્ધાત્મને નમઃ
૩૫૫. ૐ મહાક્ષાય નમઃ
૩૫૬. ૐ ગરુડધ્વજાય નમઃ
૩૫૭. ૐ અતુલાય નમઃ
૩૫૮. ૐ શરભાય નમઃ
૩૫૯. ૐ ભીમાય નમઃ
૩૬૦. ૐ સમયજ્ઞાય નમઃ
૩૬૧. ૐ હવિર્હરયે નમઃ
૩૬૨. ૐસર્વલક્ષણલક્ષણ્યાય.
૩૬૩. ૐ લક્ષ્મીવતે નમઃ
૩૬૪. ૐ સમિતિઞ્જયાય નમઃ
૩૬૫. ૐ વિક્ષરાય નમઃ
૩૬૬. ૐ રોહિતાય નમઃ
૩૬૭. ૐ માર્ગય નમઃ
૩૬૮. ૐ હેતવે નમઃ
૩૬૯. ૐ દામોદરાય નમઃ
૩૭૦. ૐ સહાય નમઃ
૩૭૧. ૐ મહીધરાય નમઃ

૩૭૨. ૐ મહાભાગાય નમઃ
૩૭૩. ૐ વેગવતે નમઃ
૩૭૪. ૐ અમિતાશનાય નમઃ
૩૭૫. ૐ ઉદ્ભવાય નમઃ
૩૭૬. ૐ ક્ષોભણાય નમઃ
૩૭૭. ૐ દેવાય નમઃ
૩૭૮. ૐ શ્રીગર્ભાય નમઃ
૩૭૯. ૐ પરમેશ્વરાય નમઃ
૩૮૦. ૐ કરણાય નમઃ
૩૮૧. ૐ કારણાય નમઃ
૩૮૨. ૐ કર્ત્રે નમઃ
૩૮૩. ૐ વિકર્ત્રે નમઃ
૩૮૪. ૐ ગહનાય નમઃ
૩૮૫. ૐ ગુહાય નમઃ
૩૮૬. ૐ વ્યવસાયાય નમઃ
૩૮૭. ૐ વ્યવસ્થાનાય નમઃ
૩૮૮. ૐ સંસ્થાનાય નમઃ
૩૮૯. ૐ સ્થાનદાય નમઃ
૩૯૦. ૐ ધ્રુવાય નમઃ
૩૯૧. ૐ પરર્દ્ધયે નમઃ
૩૯૨. ૐ પરમસ્પષ્ટાય નમઃ
૩૯૩. ૐ તુષ્ટાય નમઃ
૩૯૪. ૐ પુષ્ટાય નમઃ
૩૯૫. ૐ શુભેક્ષણાય નમઃ
૩૯૬. ૐ રામાય નમઃ
૩૯૭. ૐ વિરામાય નમઃ
૩૯૮. ૐ વિરજાયમાર્ગાય નમઃ
૩૯૯. ૐ નેયાય નમઃ
૪૦૦. ૐ નયાય નમઃ
૪૦૧. ૐ અનયાય નમઃ
૪૦૨. ૐ વીરાય નમઃ
૪૦૩. ૐશક્તિમતાંશ્રેષ્ઠાય ન.
૪૦૪. ૐ ધર્માય નમઃ
૪૦૫. ૐ ધર્મવિદુત્તમાય નમઃ
૪૦૬. ૐ વૈકુણ્ઠાય નમઃ
૪૦૭. ૐ પુરુષાય નમઃ
૪૦૮. ૐ પ્રાણાય નમઃ
૪૦૯. ૐ પ્રાણદાય નમઃ
૪૧૦. ૐ પ્રણવાય નમઃ
૪૧૧. ૐ પૃથવે નમઃ
૪૧૨. ૐ હિરણ્યગર્ભાય નમઃ
૪૧૩. ૐ શત્રુઘ્નાય નમઃ
૪૧૪. ૐ વ્યાપ્તાય નમઃ
૪૧૫. ૐ વાયવે નમઃ
૪૧૬. ૐ અધોક્ષજાય નમઃ
૪૧૭. ૐ ઋતવે નમઃ
૪૧૮. ૐ સુદર્શનાય નમઃ
૪૧૯. ૐ કાલાય નમઃ
૪૨૦. ૐ પરમેષ્ઠિને નમઃ
૪૨૧. ૐ પરિગ્રહાય નમઃ
૪૨૨. ૐ ઉગ્રાય નમઃ
૪૨૩. ૐ સંવત્સરાય નમઃ
૪૨૪. ૐ દક્ષાય નમઃ
૪૨૫. ૐ વિશ્રામાય નમઃ
૪૨૬. ૐ વિશ્વદક્ષિણાય નમઃ
૪૨૭. ૐ વિસ્તારાય નમઃ
૪૨૮. ૐ સ્થાવરસ્થાણવે
૪૨૯. ૐ પ્રમાણાય નમઃ
૪૩૦. ૐ બીજમવ્યયાય નમઃ
૪૩૧. ૐ અથાર્ય નમઃ
૪૩૨. ૐ અનર્થાય નમઃ
૪૩૩. ૐ મહાકોશાય નમઃ
૪૩૪. ૐ મહાભોગાય નમઃ
૪૩૫. ૐ મહાધનાય નમઃ
૪૩૬. ૐ અનિર્વિણ્ણાય નમઃ
૪૩૭. ૐ સ્થવિષ્ઠાય નમઃ
૪૩૮. ૐ અભુવે નમઃ
૪૩૯. ૐ ધર્મયૂપાય નમઃ
૪૪૦. ૐ મહામખાય નમઃ
૪૪૧. ૐ નક્ષત્રનેમયે નમઃ
૪૪૨. ૐ નક્ષત્રિણે નમઃ
૪૪૩. ૐ ક્ષમાય નમઃ
૪૪૪. ૐ ક્ષામાય નમઃ
૪૪૫. ૐ સમીહનાય નમઃ
૪૪૬. ૐ યજ્ઞાય નમઃ
૪૪૭. ૐ ઈજ્યાય નમઃ
૪૪૮. ૐ મહેજ્યાય નમઃ
૪૪૯. ૐ ક્રતવે નમઃ
૪૫૦. ૐ સત્રાય નમઃ
૪૫૧. ૐ સતાંગતયે નમઃ
૪૫૨. ૐ સર્વદર્શિને નમઃ
૪૫૩. ૐ વિમુક્તાત્મને નમઃ
૪૫૪. ૐ સર્વજ્ઞાય નમઃ
૪૫૫. ૐ જ્ઞાનમુત્તમાય નમઃ
૪૫૬. ૐ સુવ્રતાય નમઃ
૪૫૭. ૐ સુમુખાય નમઃ
૪૫૮. ૐ સૂક્ષ્માય નમઃ
૪૫૯. ૐ સુઘોષાય નમઃ
૪૬૦. ૐ સુખદાય નમઃ
૪૬૧. ૐ સુહૃદે નમઃ
૪૬૨. ૐ મનોહરાય નમઃ
૪૬૩. ૐ જતક્રોધાય નમઃ
૪૬૪. ૐ વીરબાહવે નમઃ
૪૬૫. ૐ વિદારણાય નમઃ
૪૬૬. ૐ સ્વાપનાય નમઃ
૪૬૭. ૐ સ્વવશાય નમઃ
૪૬૮. ૐ વ્યાપીને નમઃ
૪૬૯. ૐ નૈકાત્મને નમઃ
૪૭૦. ૐ નૈકકર્મકૃતે નમઃ
૪૭૧. ૐ વત્સરાય નમઃ
૪૭૨. ૐ વત્સલાય નમઃ
૪૭૩. ૐ વત્સિને નમઃ
૪૭૪. ૐ રત્નગર્ભાય નમઃ
૪૭૫. ૐ ધનેશ્વરાય નમઃ
૪૭૬. ૐ ધર્મગુપે નમઃ
૪૭૭. ૐ ધર્મકૃતે નમઃ
૪૭૮. ૐ ધર્મિણે નમઃ
૪૭૯. ૐ સતે નમઃ
૪૮૦. ૐ ક્ષરાય નમઃ
૪૮૧. ૐ અસતે નમઃ
૪૮૨. ૐ અક્ષરાય નમઃ
૪૮૩. ૐ અવિજ્ઞાત્રે નમઃ
૪૮૪. ૐ સહસ્રાંશવે નમઃ
૪૮૫. ૐ વિધાત્રે નમઃ
૪૮૬. ૐ કૃતલક્ષણાય નમઃ
૪૮૭. ૐ ગભસ્તિનેમયે નમઃ
૪૮૮. ૐ સત્ત્વસ્થાય નમઃ
૪૮૯. ૐ સિંહાય નમઃ
૪૯૦. ૐ ભૂતમહેશ્વરાય નમઃ
૪૯૧. ૐ આદિદેવાય નમઃ
૪૯૨. ૐ મહાદેવાય નમઃ
૪૯૩. ૐ દેવેશાય નમઃ
૪૯૪. ૐ દેવભુતે નમઃ
૪૯૫. ૐ ગુરવે નમઃ

૪૯૬. ૐ ઉત્તરાય નમઃ
૪૯૭. ૐ ગોપતયે નમઃ
૪૯૮. ૐ ગોપત્રે નમઃ
૪૯૯. ૐ જ્ઞાનગમ્યાય નમઃ
૫૦૦. ૐ પુરાતનાય નમઃ
૫૦૧. ૐ શરીરભૂતભૃતે નમઃ
૫૦૨. ૐ ભોક્ત્રે નમઃ
૫૦૩. ૐ કપીન્દ્રાય નમઃ
૫૦૪. ૐ ભૂરિદક્ષિણાય નમઃ
૫૦૫. ૐ સોમપાય નમઃ
૫૦૬. ૐ અમૃતપાય નમઃ
૫૦૭. ૐ સોમાય નમઃ
૫૦૮. ૐ પુરુજિતેય નમઃ
૫૦૯. ૐ પુરુસત્તમાય નમઃ
૫૧૦. ૐ વિનયાય નમઃ
૫૧૧. ૐ જયાય નમઃ
૫૧૨. ૐ સત્યસન્ધાય નમઃ
૫૧૩. ૐ દાર્શહાય નમઃ
૫૧૪. ૐ સાત્વતાં પતયે નમઃ
૫૧૫. ૐ જીવાય નમઃ
૫૧૬. ૐ વિનયિત્રે નમઃ
૫૧૭. ૐ સાક્ષિણે નમઃ
૫૧૮. ૐ મુકુન્દાય નમઃ
૫૧૯. ૐ અમિતવિક્રમાય નમઃ
૫૨૦. ૐ અમ્ભોનિધયે નમઃ
૫૨૧. ૐ અનન્તાત્મને નમઃ
૫૨૨. ૐ મહાદધિશયાય નમઃ
૫૨૩. ૐ અન્તકાય નમઃ
૫૨૪. ૐ અજાય નમઃ
૫૨૫. ૐ મહાર્હાય નમઃ
૫૨૬. ૐ સ્વાભાવ્યાય નમઃ
૫૨૭. ૐ જિતામિત્રાય નમઃ
૫૨૮. ૐ પ્રમોદનાય નમઃ
૫૨૯. ૐ આનન્દાય નમઃ
૫૩૦. ૐ નન્દનાય નમઃ
૫૩૧. ૐ નન્દાય નમઃ
૫૩૨. ૐ સત્યધર્મણે નમઃ
૫૩૩. ૐ ત્રિવિક્રમાય નમઃ
૫૩૪. ૐ મહર્ષિયે નમઃ
૫૩૫. ૐ કપિલાચાર્યાય નમઃ
૫૩૬. ૐ કૃતજ્ઞાય નમઃ
૫૩૭. ૐ મેદિનીપતયે નમઃ
૫૩૮. ૐ ત્રિપદાય નમઃ
૫૩૯. ૐ ત્રિદશાધ્યક્ષાય નમઃ
૫૪૦. ૐ મહાશૃઙ્ગાય નમઃ
૫૪૧. ૐ કૃતાન્તકૃતે નમઃ
૫૪૨. ૐ મહાવરાહાય નમઃ
૫૪૩. ૐ ગોવિન્દાય નમઃ
૫૪૪. ૐ સુષેણાય નમઃ
૫૪૫. ૐ કનકાઙ્ગદિને નમઃ
૫૪૬. ૐ ગુહ્યાય નમઃ
૫૪૭. ૐ ગભીરાય નમઃ
૫૪૮. ૐ ગહનાય નમઃ
૫૪૯. ૐ ગુપ્તાય નમઃ
૫૫૦. ૐ ચક્રગદાધરાય નમઃ
૫૫૧. ૐ વેધસે નમઃ
૫૫૨. ૐ સ્વાઙ્ગાય નમઃ
૫૫૩. ૐ અજિતાય નમઃ
૫૫૪. ૐ કૃષ્ણાય નમઃ
૫૫૫. ૐ દૃઢાય નમઃ
૫૫૬. ૐ સઙ્કર્ષણાય નમઃ
૫૫૭. ૐ અચ્યુતાય નમઃ
૫૫૮. ૐ વરુણાય નમઃ
૫૫૯. ૐ વારુણાય નમઃ
૫૬૦. ૐ વૃક્ષાય નમઃ
૫૬૧. ૐ પુષ્કરાક્ષાય નમઃ
૫૬૨. ૐ મહામનસે નમઃ
૫૬૩. ૐ ભગવતે નમઃ
૫૬૪. ૐ ભગઘ્ને નમઃ
૫૬૫. ૐ આનંદિને નમઃ
૫૬૬. ૐ વનમાલને નમઃ
૫૬૭. ૐ હલાયુધાય નમઃ
૫૬૮. ૐ આદિત્યાય નમઃ
૫૬૯. ૐજ્યોતિરાદિત્યાય ન.
૫૭૦. ૐ સહિષ્ણવે નમઃ
૫૭૧. ૐ ગતિસત્તમાય નમઃ
૫૭૨. ૐ સુધન્વને નમઃ
૫૭૩. ૐ ખણ્ડપરશવે નમઃ
૫૭૪. ૐ દારુણાય નમઃ
૫૭૫. ૐ દ્રવિણપ્રદાય નમઃ
૫૭૬. ૐ દિવિસ્પૃસે નમઃ
૫૭૭. ૐ સર્વદ્રદશે નમઃ
૫૭૮. ૐ વ્યાસાય નમઃ
૫૭૯. ૐ વાચસ્પતયે નમઃ
૫૮૦. ૐ અયોનિજાય નમઃ
૫૮૧. ૐ ત્રિસામને નમઃ
૫૮૨. ૐ સામગાય નમઃ
૫૮૩. ૐ સામાય નમઃ
૫૮૪. ૐ નિર્વાણાય નમઃ
૫૮૫. ૐ ભેષજાય નમઃ
૫૮૬. ૐ ભિષજે નમઃ
૫૮૭. ૐ સંન્યાસકૃતે નમઃ
૫૮૮. ૐ શમાય નમઃ
૫૮૯. ૐ શાન્તાય નમઃ
૫૯૦. ૐ નિષ્ઠાય નમઃ
૫૯૧. ૐ શાન્તયે નમઃ
૫૯૨. ૐ પરાયણાય નમઃ
૫૯૩. ૐ શુભાઙ્ગાય નમઃ
૫૯૪. ૐ શાન્તિદાય નમઃ
૫૯૫. ૐ સ્ત્રષ્ટ્રે નમઃ
૫૯૬. ૐ કુમુદાય નમઃ
૫૯૭. ૐ કુવલેશયાય નમઃ
૫૯૮. ૐ ગોહિતાય નમઃ
૫૯૯. ૐ ગોપતયે નમઃ
૬૦૦. ૐ ગોપ્ત્રે નમઃ
૬૦૧. ૐ વૃષભાક્ષાય નમઃ
૬૦૨. ૐ વૃષપ્રિયાય નમઃ
૬૦૩. ૐ અનિવર્તિને નમઃ
૬૦૪. ૐ નિવૃત્તાત્મને નમઃ
૬૦૫. ૐ સંક્ષેપ્ત્રે નમઃ
૬૦૬. ૐ ક્ષેમકૃતે નમઃ
૬૦૭. ૐ શિવાય નમઃ
૬૦૮. ૐ શ્રીવત્સવક્ષસે નમઃ
૬૦૯. ૐ શ્રીવાસાય નમઃ
૬૧૦. ૐ શ્રીપતયે નમઃ
૬૧૧. ૐ શ્રીમતાંવરાય નમઃ
૬૧૨. ૐ શ્રીદાય નમઃ
૬૧૩. ૐ શ્રીશાય નમઃ
૬૧૪. ૐ શ્રીનિવાસાય નમઃ
૬૧૫. ૐ શ્રીનિધયે નમઃ
૬૧૬. ૐ શ્રીવિભાવનાય નમઃ
૬૧૭. ૐ શ્રીધરાય નમઃ
૬૧૮. ૐ શ્રીકરાય નમઃ
૬૧૯. ૐ શ્રેયઃ શ્રીમતે નમઃ

૬૨૦. ॐ લોકત્રયાશ્રયાય નમઃ
૬૨૧. ॐ સ્વક્ષાય નમઃ
૬૨૨. ॐ સ્વજ્ઞાય નમઃ
૬૨૩. ॐ શતાનન્દાય નમઃ
૬૨૪. ॐ નન્દિને નમઃ
૬૨૫. ॐજ્યોતિર્ગણેશ્વરાય ન.
૬૨૬. ॐ વિજિયાત્મને નમઃ
૬૨૭. ॐ વિધેયાત્મને નમઃ
૬૨૮. ॐ સત્કીર્તિયે નમઃ
૬૨૯. ॐ છિન્નસંશયાય નમઃ
૬૩૦. ॐ ઉદીર્ણાય નમઃ
૬૩૧. ॐ સર્વતશ્ચક્ષુષે નમઃ
૬૩૨. ॐ અનીશાય નમઃ
૬૩૩. ॐ શાશ્વતસ્થિરાય નમઃ
૬૩૪. ॐ ભૂશયાય નમઃ
૬૩૫. ॐ ભૂષણાય નમઃ
૬૩૬. ॐ ભૂતયે નમઃ
૬૩૭. ॐ વિશોકાય નમઃ
૬૩૮. ॐ શોકનાશનાય નમઃ
૬૩૯. ॐ અર્ચિષ્મતે નમઃ
૬૪૦. ॐ અર્ચિતાય નમઃ
૬૪૧. ॐ કુમ્ભાય નમઃ
૬૪૨. ॐ વિશુદ્ધાત્મને નમઃ
૬૪૩. ॐ વિશોધનાય નમઃ
૬૪૪. ॐ અનિરુદ્ધાય નમઃ
૬૪૫. ॐ અપ્રતિરથાય નમઃ
૬૪૬. ॐ પ્રદ્યુમ્નાય નમઃ
૬૪૭. ॐ અમિતવિક્રમાય નમઃ
૬૪૮. ॐ કાલનેમિઘ્ને નમઃ
૬૪૯. ॐ વીરાય નમઃ
૬૫૦. ॐ શૌરયે નમઃ
૬૫૧. ॐ શૂરજનેશ્વરાય નમઃ
૬૫૨. ॐ ત્રિલોકાત્મને નમઃ
૬૫૩. ॐ ત્રિલોકેશાય નમઃ
૬૫૪. ॐ કેશવાય નમઃ
૬૫૫. ॐ કેશિઘ્ને નમઃ
૬૫૬. ॐ હરયે નમઃ
૬૫૭. ॐ કામદેવાય નમઃ
૬૫૮. ॐ કામપાલાય નમઃ
૬૫૯. ॐ કામિને નમઃ
૬૬૦. ॐ કાન્તાય નમઃ
૬૬૧. ॐ કૃતાગમાય નમઃ
૬૬૨. ॐ અનિર્દેશ્યવપુષે નમઃ
૬૬૩. ॐ વિષ્ણવે નમઃ
૬૬૪. ॐ વીરાય નમઃ
૬૬૫. ॐ અનન્તાય નમઃ
૬૬૬. ॐ ધનઞ્જયાય નમઃ
૬૬૭. ॐ બ્રહ્મણ્યાય નમઃ
૬૬૮. ॐ બ્રહ્મકૃતે નમઃ
૬૬૯. ॐ બ્રહ્મિણે નમઃ
૬૭૦. ॐ બ્રહ્મવિવર્ધનાય નમઃ
૬૭૧. ॐ બ્રહ્મવિદે નમઃ
૬૭૨. ॐ બ્રાહ્મણાય નમઃ
૬૭૩. ॐ બ્રહ્મિણે નમઃ
૬૭૪. ॐ બ્રહ્મજ્ઞાય નમઃ
૬૭૫. ॐ બ્રાહ્મણપ્રિયાય નમઃ
૬૭૬. ॐ મહાક્રમાય નમઃ
૬૭૭. ॐ મહાકર્મણે નમઃ
૬૭૮. ॐ મહાતેસે નમઃ
૬૭૯. ॐ મહોરગાય નમઃ
૬૮૦. ॐ મહાક્રતવે નમઃ
૬૮૧. ॐ મહાયજ્વને નમઃ
૬૮૨. ॐ મહાયજ્ઞાય નમઃ
૬૮૩. ॐ મહાહવિષે નમઃ
૬૮૪. ॐ સ્તવ્યાય નમઃ
૬૮૫. ॐ સ્તવપ્રિયાય નમઃ
૬૮૬. ॐ સ્તોત્રાય નમઃ
૬૮૭. ॐ સ્તુતયે નમઃ
૬૮૮. ॐ સ્તોત્રે નમઃ
૬૮૯. ॐ રણપ્રિયાય નમઃ
૬૯૦. ॐ પૂર્ણાય નમઃ
૬૯૧. ॐ પૂરયિત્રે નમઃ
૬૯૨. ॐ પુણ્યાય નમઃ
૬૯૩. ॐ પુણ્યકીતયે નમઃ
૬૯૪. ॐ અનામયાય નમઃ
૬૯૫. ॐ મનોજવાય નમઃ
૬૯૬. ॐ તીર્થકરાય નમઃ
૬૯૭. ॐ વસુરેતસે નમઃ
૬૯૮. ॐ વસુપ્રદાય નમઃ
૬૯૯. ॐ સુવર્ણવર્ણાય નમઃ
૭૦૦. ॐ વાસુદેવાય નમઃ
૭૦૧. ॐ વસુવે નમઃ
૭૦૨. ॐ વસુમનસે નમઃ
૭૦૩. ॐ હવિષે નમઃ
૭૦૪. ॐ સદ્ગતયે નમઃ
૭૦૫. ॐ સત્કૃતયે નમઃ
૭૦૬. ॐ સત્તાયૈ નમઃ
૭૦૭. ॐ સદ્ભૂતયે નમઃ
૭૦૮. ॐ સત્પરાયણાય નમઃ
૭૦૯. ॐ શૂરસેનાય નમઃ
૭૧૦. ॐ યદુશ્રેષ્ઠાય નમઃ
૭૧૧. ॐ સન્નિવાસાય નમઃ
૭૧૨. ॐ સુયામુનાય નમઃ
૭૧૩. ॐ ભૂતાવાસાય નમઃ
૭૧૪. ॐ વાસુદેવાય નમઃ
૭૧૫. ॐ સર્વાસુનિલયાય નમઃ
૭૧૬. ॐ અનલાય નમઃ
૭૧૭. ॐ દર્પઘ્ને નમઃ
૭૧૮. ॐ દર્પદાય નમઃ
૭૧૯. ॐ દપ્તાય નમઃ
૭૨૦. ॐ દુર્ધરાય નમઃ
૭૨૧. ॐ અપરાજિતાય નમઃ
૭૨૨. ॐ વિશ્વમૂર્તયે નમઃ
૭૨૩. ॐ મહામૂર્તયે નમઃ
૭૨૪. ॐ દીપ્તમૂર્તયે નમઃ
૭૨૫. ॐ અમૂર્તિમતે નમઃ
૭૨૬. ॐ અનેકમૂર્તયે નમઃ
૭૨૭. ॐ અવ્યક્તાય નમઃ
૭૨૮. ॐ શતમૂર્તયે નમઃ
૭૨૯. ॐ શતાનનાય નમઃ
૭૩૦. ॐ એકાય નમઃ
૭૩૧. ॐ નૈકાય નમઃ
૭૩૨. ॐ સવાય નમઃ
૭૩૩. ॐ વાય નમઃ
૭૩૪. ॐ કાય નમઃ
૭૩૫. ॐ કસ્મૈ નમઃ
૭૩૬. ॐ યસ્મૈ નમઃ
૭૩૭. ॐ તસ્મૈ નમઃ
૭૩૮. ॐ પદમનુત્તમાય નમઃ
૭૩૯. ॐ લોકબન્ધવે નમઃ
૭૪૦. ॐ લોકનાથાય નમઃ
૭૪૧. ॐ માધવાય નમઃ
૭૪૨. ॐ ભક્તવત્સલાય નમઃ
૭૪૩. ॐ સુવર્ણવર્ણાય નમઃ
૭૪૪. ॐ હેમાઙ્ગાય નમઃ
૭૪૫. ॐ વરાઙ્ગાય નમઃ
૭૪૬. ॐ ચન્દનાઙ્ગદિને નમઃ
૭૪૭. ॐ વીરઘ્ને નમઃ

૭૪૮. ૐ વિષમાય નમઃ
૭૪૯. ૐ શૂન્યાય નમઃ
૭૫૦. ૐ ધૃતાશિષે નમઃ
૭૫૧. ૐ અચલાય નમઃ
૭૫૨. ૐ ચલાય નમઃ
૭૫૩. ૐ અમાનિને નમઃ
૭૫૪. ૐ માનદાય નમઃ
૭૫૫. ૐ માન્યાય નમઃ
૭૫૬. ૐ લોકસ્વામીને નમઃ
૭૫૭. ૐ ત્રિલોકધૃગે નમઃ
૭૫૮. ૐ સુમેધાસે નમઃ
૭૫૯. ૐ મેધજાય નમઃ
૭૬૦. ૐ ધન્યાય નમઃ
૭૬૧. ૐ સત્યમેધસે નમઃ
૭૬૨. ૐ ધરાધરાય નમઃ
૭૬૩. ૐ તેજોવૃષાય નમઃ
૭૬૪. ૐ દ્યુતિધરાય નમઃ
૭૬૫. ૐસર્વશસ્ત્રભૃતાંવરાય.
૭૬૬. ૐ પ્રગ્રહાય નમઃ
૭૬૭. ૐ નિગ્રહાય નમઃ
૭૬૮. ૐ વ્યગ્રાય નમઃ
૭૬૯. ૐ નૈકશ્રૃઙ્ગાય નમઃ
૭૭૦. ૐ ગદાગ્રજાય નમઃ
૭૭૧. ૐ ચતુર્મૂર્તયે નમઃ
૭૭૨. ૐ ચતુર્બાહવે નમઃ
૭૭૩. ૐ ચતુર્વ્યૂહાય નમઃ
૭૭૪. ૐ ચતુર્ગતયે નમઃ
૭૭૫. ૐ ચતુરાત્મને નમઃ
૭૭૬. ૐ ચતુર્ભાવાય નમઃ
૭૭૭. ૐ ચતુર્વેદવિદે નમઃ
૭૭૮. ૐ એકપદે નમઃ
૭૭૯. ૐ સમાવર્તાય નમઃ
૭૮૦. ૐ નિવૃત્તાત્મને નમઃ
૭૮૧. ૐ દુર્જયાય નમઃ
૭૮૨. ૐ દુરતિક્રમાય નમઃ
૭૮૩. ૐ દુર્લભાય નમઃ
૭૮૪. ૐ દુર્ગમાય નમઃ
૭૮૫. ૐ દુર્ગાય નમઃ
૭૮૬. ૐ દુરાવાસાય નમઃ
૭૮૭. ૐ દુરારિઘ્ને નમઃ
૭૮૮. ૐ શુભાઙ્ગાય નમઃ
૭૮૯. ૐ લોકસારંગાય નમઃ
૭૯૦. ૐ સુતન્તવે નમઃ
૭૯૧. ૐ તન્તુવર્ધનાય નમઃ
૭૯૨. ૐ ઈન્દ્રકર્મણે નમઃ
૭૯૩. ૐ મહાકર્મણે નમઃ
૭૯૪. ૐ કૃતકર્મણે નમઃ
૭૯૫. ૐ કૃતાગમાય નમઃ
૭૯૬. ૐ ઉદ્ભવાય નમઃ
૭૯૭. ૐ સુન્દરાય નમઃ
૭૯૮. ૐ સુન્દાય નમઃ
૭૯૯. ૐ રત્નનાભાય નમઃ
૮૦૦. ૐ સુલોચનાય નમઃ
૮૦૧. ૐ અર્કાય નમઃ
૮૦૨. ૐ વાજસનાય નમઃ
૮૦૩. ૐ શૃઙ્ગિણે નમઃ
૮૦૪. ૐ જયન્તાય નમઃ
૮૦૫. ૐ સર્વવિજ્જયિને નમઃ
૮૦૬. ૐ સુવર્ણબિન્દવે નમઃ
૮૦૭. ૐ રક્ષોભ્યાય નમઃ
૮૦૮. ૐસર્વવાગીશ્વરેશ્વરાય.
૮૦૯. ૐ મહાહ્રદાય નમઃ
૮૧૦. ૐ મહાગર્તાય નમઃ
૮૧૧. ૐ મહાભૂતાય નમઃ
૮૧૨. ૐ મહાનિધયે નમઃ
૮૧૩. ૐ કુમુદાય નમઃ
૮૧૪. ૐ કુન્દરાય નમઃ
૮૧૫. ૐ કુન્દાય નમઃ
૮૧૬. ૐ પર્જન્યાય નમઃ
૮૧૭. ૐ પાવનાય નમઃ
૮૧૮. ૐ અનિલાય નમઃ
૮૧૯. ૐ અમૃતાશાય નમઃ
૮૨૦. ૐ અમૃતવપુષે નમઃ
૮૨૧. ૐ સર્વજ્ઞાય નમઃ
૮૨૨. ૐ સર્વતોમુખાય નમઃ
૮૨૩. ૐ સુલભાય નમઃ
૮૨૪. ૐ સુવ્રતાય નમઃ
૮૨૫. ૐ સુદ્ધાય નમઃ
૮૨૬. ૐ શત્રુજિચ્છત્રુતાપનાય.
૮૨૭. ૐન્યગ્રોધોદુમ્બરાય ન.
૮૨૮. ૐ અશ્વત્થાય નમઃ
૮૨૯. ૐ ચાણૂરાન્ધ્રનિષૂદનાય.
૮૩૦. ૐ સહસ્રાર્ચિષે નમઃ
૮૩૧. ૐ સપ્તજિહ્વાય નમઃ
૮૩૨. ૐ સપ્તૈધસૈ નમઃ
૮૩૩. ૐ સપ્તવાહનાય નમઃ
૮૩૪. ૐ અમૂર્તિયે નમઃ
૮૩૫. ૐ અનઘાય નમઃ
૮૩૬. ૐ અચિન્ત્યાય નમઃ
૮૩૭. ૐ ભયકૃતે નમઃ
૮૩૮. ૐ ભયનાશનાય નમઃ
૮૩૯. ૐ અણવે નમઃ
૮૪૦. ૐ બૃહતે નમઃ
૮૪૧. ૐ કૃશાય નમઃ
૮૪૨. ૐ સ્થૂલાય નમઃ
૮૪૩. ૐ ગુણભૂતે નમઃ
૮૪૪. ૐ નિર્ગુણાય નમઃ
૮૪૫. ૐ મહતે નમઃ
૮૪૬. ૐ અધૃતાય નમઃ
૮૪૭. ૐ સ્વધૃતાય નમઃ
૮૪૮. ૐ સ્વાસ્યાય નમઃ
૮૪૯. ૐ પ્રાગ્વંશાય નમઃ
૮૫૦. ૐ વંશવર્ધનાય નમઃ
૮૫૧. ૐ ભારભૃતે નમઃ
૮૫૨. ૐ કથિતાય નમઃ
૮૫૩. ૐ યોગિને નમઃ
૮૫૪. ૐ યોગીશાય નમઃ
૮૫૫. ૐ સર્વકામદાય નમઃ
૮૫૬. ૐ આશ્રમાય નમઃ
૮૫૭. ૐ શ્રમણાય નમઃ
૮૫૮. ૐ ક્ષામાય નમઃ
૮૫૯. ૐ સુપર્ણાય નમઃ
૮૬૦. ૐ વાયુવાહનાય નમઃ
૮૬૧. ૐ ધનુર્ધરાય નમઃ
૮૬૨. ૐ ધનુર્વેદાય નમઃ
૮૬૩. ૐ દણ્ડાય નમઃ
૮૬૪. ૐ દમયિત્રે નમઃ
૮૬૫. ૐ દમાય નમઃ
૮૬૬. ૐ અપરાજિતાય નમઃ
૮૬૭. ૐ સર્વસહાય નમઃ
૮૬૮. ૐ નિયન્ત્રે નમઃ
૮૬૯. ૐ નિયમાય નમઃ
૮૭૦. ૐ યમાય નમઃ
૮૭૧. ૐ સત્ત્વવતે નમઃ
૮૭૨. ૐ સાત્વિકાય નમઃ
૮૭૩. ૐ સત્યાય નમઃ
૮૭૪. ૐસત્યધર્મપરાયણાય.
૮૭૫. ૐ અભિપ્રાયાય નમઃ

૮૭૬. ૐ પ્રિયાર્હાય નમઃ
૮૭૭. ૐ અર્હાય નમઃ
૮૭૮. ૐ પ્રિયકૃતે નમઃ
૮૭૯. ૐ પ્રીતિવર્ધનાય નમઃ
૮૮૦. ૐ વિહાયસગતયે નમઃ
૮૮૧. ૐ જ્યોતિષે નમઃ
૮૮૨. ૐ સુરુચયે નમઃ
૮૮૩. ૐ હુતભુગ્વિભવે નમઃ
૮૮૪. ૐ રવયે નમઃ
૮૮૫. ૐ વિરોચનાય નમઃ
૮૮૬. ૐ સૂર્યાય નમઃ
૮૮૭. ૐ સવિત્રે નમઃ
૮૮૮. ૐ રવિલોચનાય નમઃ
૮૮૯. ૐઅનન્તહુતભુગ્ભોક્ત્રે.
૮૯૦. ૐ સુખદાય નમઃ
૮૯૧. ૐ નૈકજાય નમઃ
૮૯૨. ૐ અગ્રજાય નમઃ
૮૯૩. ૐ અનિર્વિણ્ણાય નમઃ
૮૯૪. ૐ સદામર્ષિણે નમઃ
૮૯૫. ૐ લોકાધિષ્ઠાનાય નમઃ
૮૯૬. ૐ અદ્ભૂતાય નમઃ
૮૯૭. ૐ સનાતે નમઃ
૮૯૮. ૐ સનાતનતમાય નમઃ
૮૯૯. ૐ કપિલાય નમઃ
૯૦૦. ૐ કપયેવ્યાય નમઃ
૯૦૧. ૐ સ્વસ્તિદાય નમઃ
૯૦૨. ૐ સ્વસ્તિકૃતે નમઃ
૯૦૩. ૐ સ્વસ્તિને નમઃ
૯૦૪. ૐ સ્વસ્તિભુજે નમઃ
૯૦૫. ૐ સ્વસ્તિદક્ષિણાય નમઃ
૯૦૬. ૐ અરૌદ્રાય નમઃ
૯૦૭. ૐ કુણ્ડલિને નમઃ
૯૦૮. ૐ ચક્રિણે નમઃ
૯૦૯. ૐ વિક્રમિણે નમઃ
૯૧૦. ૐ ઉર્જિતશાસનાય નમઃ
૯૧૧. ૐ શબ્દાતિગાય નમઃ
૯૧૨. ૐ શબ્દસહાય નમઃ
૯૧૩. ૐ શિશિરાય નમઃ
૯૧૪. ૐ શર્વરીકરાય નમઃ
૯૧૫. ૐ અક્રૂરાય નમઃ
૯૧૬. ૐ પેશલાય નમઃ
૯૧૭. ૐ દક્ષાય નમઃ
૯૧૮. ૐ દક્ષિણાય નમઃ
૯૧૯. ૐ ક્ષમિણાંવરાય નમઃ
૯૨૦. ૐ વિદ્વત્તમાય નમઃ
૯૨૧. ૐ વીતભયાય નમઃ
૯૨૨. ૐપુણ્યશ્રવણકીર્તનાય.
૯૨૩. ૐ ઉત્તારણાય નમઃ
૯૨૪. ૐ દુષ્કૃતિઘ્ને નમઃ
૯૨૫. ૐ પુણ્યાય નમઃ
૯૨૬. ૐદુઃસ્વપ્નનાશનાય નમઃ
૯૨૭. ૐ વીરઘ્ને નમઃ
૯૨૮. ૐ રક્ષણાય નમઃ
૯૨૯. ૐ સંતાય નમઃ
૯૩૦. ૐ જીવનાય નમઃ
૯૩૧. ૐ પર્યવસ્થિતાય નમઃ
૯૩૨. ૐ અનંતરૂપાય નમઃ
૯૩૩. ૐ અનંતશ્રીયે નમઃ
૯૩૪. ૐ જિતમન્યવે નમઃ
૯૩૫. ૐ ભયાવહાય નમઃ
૯૩૬. ૐ ચતુરસ્ત્રાય નમઃ
૯૩૭. ૐ ગભીરાત્મને નમઃ
૯૩૮. ૐ વિદિશાય નમઃ
૯૩૯. ૐ વ્યાદિશાય નમઃ
૯૪૦. ૐ દિશાય નમઃ
૯૪૧. ૐ અનાદયે નમઃ
૯૪૨. ૐ ભુવે નમઃ
૯૪૩. ૐ ભવોલક્ષ્મ્યૈ નમઃ
૯૪૪. ૐ સુવીરાય નમઃ
૯૪૫. ૐ રુચિરાઙ્ગદાય નમઃ
૯૪૬. ૐ જનનાય નમઃ
૯૪૭. ૐ જનજન્માદયે નમઃ
૯૪૮. ૐ ભીમાય નમઃ
૯૪૯. ૐ ભીમપરાક્રમાય નમઃ
૯૫૦. ૐઆધારનિલયાય ન.
૯૫૧. ૐ ધાત્રે નમઃ
૯૫૨. ૐ પુષ્પહાસાય નમઃ
૯૫૩. ૐ પ્રજાગરાય નમઃ
૯૫૪. ૐ ઉર્ધ્વગાય નમઃ
૯૫૫. ૐ સત્પથાચારાય નમઃ
૯૫૬. ૐ પ્રાણદાય નમઃ
૯૫૭. ૐ પ્રણવાય નમઃ
૯૫૮. ૐ પણાય નમઃ
૯૫૯. ૐ પ્રમાણાય નમઃ
૯૬૦. ૐ પ્રાણનિલયાય નમઃ
૯૬૧. ૐ પ્રાણભૃતે નમઃ
૯૬૨. ૐ પ્રાણજીવનાય નમઃ
૯૬૩. ૐ તત્ત્વાય નમઃ
૯૬૪. ૐ તત્ત્વવિદે નમઃ
૯૬૫. ૐ એકાત્મને નમઃ
૯૬૬. ૐ જન્મમૃત્યુજરાતિગાય.
૯૬૭. ૐભૂર્ભુવઃસ્વસ્તરવે નમઃ
૯૬૮. ૐ તારાય નમઃ
૯૬૯. ૐ સપિત્રે નમઃ
૯૭૦. ૐ પ્રપિતામહાય નમઃ
૯૭૧. ૐ યજ્ઞાય નમઃ
૯૭૨. ૐ યજ્ઞપતયે નમઃ
૯૭૩. ૐ યજ્વને નમઃ
૯૭૪. ૐ યજ્ઞાઙ્ગાય નમઃ
૯૭૫. ૐ યજ્ઞવાહનાય નમઃ
૯૭૬. ૐ યજ્ઞભતે નમઃ
૯૭૭. ૐ યજ્ઞકૃતે નમઃ
૯૭૮. ૐ યજ્ઞિને નમઃ
૯૭૯. ૐ યજ્ઞભુજે નમઃ
૯૮૦. ૐ યજ્ઞસાધનાય નમઃ
૯૮૧. ૐ યજ્ઞાન્તકૃતે નમઃ
૯૮૨. ૐ યજ્ઞગુહ્યાય નમઃ
૯૮૩. ૐ અન્નાય નમઃ
૯૮૪. ૐ અન્નાદાય નમઃ
૯૮૫. ૐ આત્મયોનયે નમઃ
૯૮૬. ૐ સ્વયંજાતાય નમઃ
૯૮૭. ૐ વૈખાનાય નમઃ
૯૮૮. ૐ સામગાયનાય નમઃ
૯૮૯. ૐ દેવકીનન્દનાય નમઃ
૯૯૦. ૐ સ્રષ્ટ્રે નમઃ
૯૯૧. ૐ ક્ષિતીશાય નમઃ
૯૯૨. ૐ પાપનાશનાય નમઃ
૯૯૩. ૐ શઙ્ખભુતે નમઃ
૯૯૪. ૐ નંદકીને નમઃ
૯૯૫. ૐ ચક્રિણે નમઃ
૯૯૬. ૐ શારંગધન્વને નમઃ
૯૯૭. ૐ ગદાધરાય નમઃ
૯૯૮. ૐ રથાઙ્ગપણયે નમઃ
૯૯૯. ૐ રક્ષોભ્યાય નમઃ
૧૦૦૦.ૐ સર્વપ્રહરણાયુધાય ન.

**॥ શ્રીવિષ્ણોર્દિવ્ય સહસ્ત્ર નામાવલી સમાપ્ત ॥**